Library IIAS, Shimla
S 808.049 12 B 469 K
00098172

S. V. UNIVERSITY ORIENTAL SERIES - No. 1

*General Editor* : PROF. J. CHENNA REDDY, M.A., Ph.D.

# KĀVYĀMṚTAM

OF

Śrīvatsalāñchana Bhaṭṭācārya

EDITED BY

DR. K.S. RAMAMURTI, M.A., Ph.D.

Lecturer in Sanskrit,

S.V.U.O.R. Institute, Tirupati.

PUBLISHED BY

F. J. CHENNA REDDY, M.A., Ph.D.

DIRECTOR

S. V. UNIVERSITY ORIENTAL RESEARCH INSTITUTE

TIRUPATI

1971

49 12
59 K

S
.049
12
169 K

# CONTENTS

1. Preface

2. Introduction

3. Paricayaḥ

4. Abbreviations

5. Contents of the text

6. Text

7. Index of the examples

8. Index of the Kārikas

9. Index of the unidentified Kārikas

# PREFACE

I have immense pleasure in introducing to the lovers of literature this rare and unique work *Kāvyāmṛtam* by Srivatsalāñchana Bhaṭṭācārya who lived in the later half of the 16th century. Though this work does not propound any new theory in the realm of literary criticism endeavours appear to have been made therein to enliven the theory of Mahimabhaṭṭa which had already fallen into oblivion. An unsuccessful attempt is also made to refute Mammaṭa's arguments advanced for re-establishing *Dhvani* after encountering the onslaughts of Mahimabhatta on Ānandavardhana's *Dhvani* theory. The merits and the other special features of the work have been elaborately brought out by the Editor himself.

This Research Institute was originally established at Tirupati in 1940 under the authority of the Tirupati-Tirumala Devasthanams, Tirupati. A little over 60 works in Sanskrit, Telugu and Tamil have been published upto 1956 under different series of the Institute. They include mainly publications of rare and valuable manuscripts selected from those preserved in Sri Venkateswara Oriental Institute, though some others are the results of the independent research conducted under Triennial programmes by members of the Research Section of the Institute.

Sri Venkateswara University was established at Tirupati in September, 1954 and the Institute with all its manuscripts and staff was transferred to the University on 1-11-1956 to achieve better results in research and teaching when post-graduate courses in Telugu and Sanskrit were to be instituted by S.V. University.

The S.V. University authorities contemplated reorganisation of the Institute, but due to the paucity of funds, *statusquo* was maintained until June, 1959. S.V. University Oriental Journal Vol. I of 1958 was issued during that period and many works were made ready for publication. But those work on which was started before 1956 and completed after that date were given away to the T.T. Devasthanams for publication.

Others either remained unpublished or handed over to the editor or author with permission for publishing them out of his own funds.

In July 1959, the Principal, S.V. University College was made the *ex-officio* Director of the Institute and the Research Section of the Institute ceased to exist as some of its members were selected to serve on the language departments of S.V.U. College and the remaining retired soon. It is only in July, 1968 the present Director took independent charge of the Institute. During the interim period of nine years from 1959 to 1968 no publications were brought out and only 6 more volumes ending with Vol. VII of 1964 of the Journal were issued.

Within the short period of 3 years from 1968 to 1971 the S.V.U.O. Journal is brought uptodate. Vols. VIII to XII of 1969 are released from the Press and Vol. XIII is awaiting release soon. Meanwhile S.V.U.O.R. Institute was reorganised from 1-1-1970 and book publication work also has been taken up promptly. Thanks to the dynamic personality of Dr. D. Jaganatha Reddy our beloved Vice-Chancellor who rejuvenated all types of activities of the Institute. The immediate result is the publication of the *Kāvyāmṛtam* a Sanskrit work as number one in the S.V.U. Oriental Series. We are confident that other publications also follow soon.

TIRUPATI,<br>5th May, 1971.

**J. CHENNA REDDY,**<br>GENERAL EDITOR

# INTRODUCTION

A broad analysis of Sanskrit *Alaṅkāraśāstra* shows that there are two distinct divisions – the original and the encyclopaedic. Writers like Bharata, Daṇḍi, Bhāmaha, Vāmana and Ānandavardhana belonging to the early centuries represent the first while the authors like Vidyānātha and Vidyādhara represent the second division. The originals are those that tried to establish definite theories regarding the soul of poetry. The encyclopaedias simply codify the various aspects of rhetoric expounded by the great thinkers. But scholars such as Mammaṭa and Viśvanātha who occupy a prominant place in the galaxy of rhetoricians stand in between. Mammaṭa is a catch-word in rhetoric. The popularity of his *Kāvyaprakāśa* is revelaed by the numerous commentaries it commanded. But this is also one of the works that was criticized by Jagannātha paṇḍita whose genius and originality brought him to the first catagory of writers. But a close examination reveals that his arguments regarding *Rasa* based on the Upanishadic line *raso vai saḥ rasaṃ hy evāyaṃ labdhvānandī bhavati* had their roots in the theory of Śrīvatsa only.

Śrīvatsalāñchana Bhaṭṭācārya is the author of the present work *Kāvyāmṛta* – a treatise on rhetoric. Besides this, he wrote (1) *Sārabodhinī*, a commentary on Mammaṭa's *Kāvyaprakāśa*, (2) *Kāvyaparikṣā*, a work on poetics and (3) *Rāmodayanāṭaka* a play.[1] The *Sārabodhinī* and the *Rāmodayanāṭaka* are not yet published. The *Kāvyaparikṣā* was edited by Dr. P. L. Vaidya and published by the Mithila Institute of Post-Graduate Studies and Research in Sanskrit Learning, Darbhanga.

From the colophons of his compositions we understand that Śrīvatsalāñchana's father was Mahāmahopādhyāya Viṣṇudharācārya, himself an eminent scholar in all the branches of learning like Nyāya, Mīmāṃsā, Grammar and Philosophy. Śrīvatsa did not speak of his preceptor or any other relevant

1. Introduction of KPa. p. 10.

details of his life in his works so far traced. It is also noticed from his books that he is an ardent devotee of Lord Śrī Rāma.

Dr. P.L. Vaidya after setting aside the dates given by Dr. P.V. Kane[1] and Dr. De[2], arrives at the conclusion based on the date of Caṇḍidāsa, whose influence is clearly seen on Śrīvatsa, that Śrīvatsa might have flourished between A.D. 1323 and 1380. Śrīvatsa's definition of *Kāvya-'kāvyamāsvādajīvātuḥ padasaṃdarbha ucyate'* is exactly identical with that of Caṇḍidāsa who says *āsvādajīvātuḥ padasaṃdarbhaḥ kāvyam*. As the *Kāvyāmṛtam* of Śrīvatsa was not available to Dr. Vaidya he could not examine some more statements that throw further light on the problem of date of Śrīvatsa.

Śrīvatsa is mentioned by Kamalākarabhaṭṭa (1612) and Jagannātha Paṇḍita (A.D. 1620–1660).

In the citations given in the *Kāvyāmṛtam* there are two verses (nos. 168 and 228) – one in praise of the king of Gauḍa, and the other in praise of king Mukunda. Most probably these two kings referred to may be one and the same, as understood from an account given in the History of Orissa. "Mukunda Deva ascended the throne in Śaka 1481 (A.D. 1558–59) and ruled over the country for about eight years. The whole period of his reign was spent in continual warfare and this last Hindu king of Orissa died on the battle field in Śaka. 1490 (A.D. 1568). An inscription in Telugu on a pillar at Drākṣārāma gives ample evidence to prove that he was the overlord of Gauḍa country. It states that "the king while ruling from his throne at Kataka (Cuttuck) having *conquered the Gauḍa country* giving promise of favour to the Gauḍa king and having performed the pearl *Tula puruṣa* and other donations at the ganga remitted the duties on the marriages in the 27th sthala attached to Rājamahendravaram" (*History of Orissa* by R.D. Banerji, M.A., pp. 342–'43).

From this account we understand that the Gouḍendra spoken of in verse No. 168 is no other than Mukunda referred to

1. Later than A.D. 1400. Introduction to KPa. p. 10.
2. Cannot be earlier than 14th century. ibid.

in verse No. 228. If this were to be correct we conclude that Śrīvatsa must have been a contemporary to Mukunda and must have survived him even after A.D. 1568

The present work, according to the author, is intended to be a criticism on the *Kāvyaprakāśa* of Mammṭa. The procedure he adopted in the beginning is to explain the *Kāvyaprakāśa* first and later to advance the criticism against the statement so explained. But he does not seem to have strictly adhered to this method throughout. This shows that Ś.īvatsa has criticized the views of Mammaṭa only at a few important places as in the case of a definition of a *kāvya*. He also followed Mammaṭa in the maximum portion of the text. He took the *Kārikas* of Mammaṭa only as the basis. Also, the examples cited are not different from those of Mammaṭa in most of the places.

The whole *Kāvyāmṛta* is divided into seven chapters. The first deals with the criticism of Mammaṭa's definition of *kāvya*. In this chapter he also shows his leanings towards Mahimabhaṭṭa. The nature of *śabda* and *artha* is dealt with in the second chapter. The third exposes *Dhvani* with its varieties and *Rasa*. He accepts only four sentiments, i.e. *Śṛṅgāra*. *Vira*. *Hāsya* and *Adbhuta* as important. He does not like the hairsplitting division of *Avivakṣitavācya*, a division of *Dhvani* given by the ancients, as it is faulty and serves no purpose. The fourth chapter is devoted to *Guṇibhūtavyaṅgya*. In dealing with the *Doṣas* in the fifth chapter, he accepts all the *Doṣas* enumerated by the ancients concerning *śabda* and *artha*. The sixth is devoted for *Guṇas*. Here also he sails with the ancients and differs from Mammaṭa at certain places. Finally the seventh chapter is completely meant for the *śabda* and *artha Alaṅkāras*. Here he gives *in toto* sixty nine *arthālaṅkāras*.

**A few features of the work**

(1) Śrīvatsa criticizes the definition of *kāvya* given by Mammaṭa and upholds the definition of Bhoja.

(2) He differs from Mammaṭa in the treatment of the verses *bhadrātmano°* (6) and *bhrama dhārmika°* (8) stating that the

second meaning can safely be taken as *anumāna* instead of *vyañjanā*.

(3) He accepts only four *Rasas* namely, *Śṛṅgāra*, *Vīra*, *Hāsya* and *Adbhuta* as against the eight enumerated by the ancients on the ground that the other sentiments like *Śānta*, *Vīra*, *Raudra* and *Bhayānaka* do not give any pleasure. He also does not accept *Dānavīra*. But in his *Sārabodhinī* he seems to have accepted *Karuṇa* and others.[1]

(4) He does not accept all the twelve varieties of *Artha-śaktyudbhava-dhvani* given by Mammaṭa and reduces *Kavipraudhokti-siddha* and *Kavinibaddhapraudhokti-siddha* into one group.

(5) He does not give importance to *Doṣas* like *cyuta-saṃskṛti* in a *kāvya*, as they are common both for *kāvya* and *akāvya*. He dispenses with the faults like *virodha*, *grāmya* and *neyārtha*.

Śrivatsa does not give any definition of a *Kāvya* in his *Kāvyāmṛtam* but seems to have defined it as *kāvyamāsvādajīvātuḥ padasaṃdarbha ucyate* in his *Kāvyaparīkṣā*, which is exactly identical with the definition *āsvādajīvātuḥ padasaṃdarbhaḥ kāvyam* of Caṇḍīdāsa.

In this connection it may not be out of place to say a few words about a similar work called *Kavyaprakāśa-khaṇḍana* by Siddha Candra Gani, a Jain writer. In the introduction of this text the editor has established that Siddha Candra was born either in A.D 1587 or 1588 and lived for at least 77 years though the exact year of his death is not yet fixed. Siddha Candra is a Mahāmahopādhyāya and an eminent scholar in many a branch of learning. He enjoyed the patronage of the Mogul emperors like Akbar and Jahangir, and a contemporary of Jagannātha Paṇḍita and wrote about 19 works.

If the above account were to be correct, it is clearly noted that Siddha Chandra Gani is a junior to Śrīvatsalāñchana, the author of the present work, as Śrīvatsalāñchana was referred to by Jagannātha Paṇḍita in his *Rasagaṅgādhara*.

1. KP - Jhalkikar ed. p. 112.

At this stage it is interesting to note that the text *Kāvya-prakāśa-khaṇḍana* closely resembles *kāvyāmṛta* of Śrīvatsalāñchana in almost all respects. Specially the verse *pararacitakāvya-kaṇṭaka°* in the beginning of the text occurs in both the texts. Both the texts begin in the same manner *tatra anuvādapūrvakaṃ kāvyaprakāśakhaṇḍanam ārabhyate.* Both the texts do not give a definition of a *kāvya* (for more information I refer my readers to the paras noted in the foot note[1]). Though the *Kāvya-prakāśa-khaṇḍana* gives information more elaborately how strange it is to have two different manuscripts of a work of the same nature with identical passages repeated verbatim in the name of different *authors belonging to different 'isms' and different ages !!!*

**Manuscripts' information**

(a) A paper manuscript of this work in Devanāgari bearing No. 6839 is available with our Institute Library. This is a transcript of the manuscript borrowed from the Bharatiya Itihasa Samsodhana Mandali, Poona.

(b) Manuscript of the Bharatiya Itihasa Samsodhana Mandali, Poona. (क)

| | | |
|---|---|---|
| Material | ... | Paper |
| No. of folios | ... | 30 |
| Size | ... | 27 × 12 cms |
| No. | ... | 119/7 |
| Script | ... | Devanāgari. |

(c) One more manuscript is available with the Trivandrum Library.

I have gone through the above two manuscripts and also got some of the readings verified from the Manuscript of the Trivandrum Library. Even then, I am sorry to inform that some of the verses cited as examples could not be properly understood for effecting corrections without rewriting them, and on a few occasions the prose passages also are ambiguous and cannot be corrected.

1. KM. p. 7, para. 2 – KPK. p. 10, para 2; KM. p. 12, para 1. KPk. p. 21, para 3, etc.

I take this opportunity to offer my thanks to my authc ties who encouraged me to edit and publish this rare manuscript. My thanks are also due to the authorities of the Bharatiya Itihasa Samsodhana Mandali, Poona who graciously lent their manuscript for collating and the Curator of the Trivandrum Library who allowed us to go through their Manuscript. Finally I also thank the Director of our Institute Prof J. Chenna Reddy, M.A., Ph.D., who took keen interest in hastening up the publication and my friend Sri N.C.V. Narasinhacharya, In of the Department of Sahitya, S.V. O. College, Tirupati for alround help. I thank my collegues also for their co-operatio.

# परिचयः

कृत्स्नस्याप्यलङ्कारशास्त्रस्य स्थूलशः विभागे क्रियमाणे तत्र द्वौ प्रधानविभागौ स्फुरतः – तत्रैकः मौलिकः, अन्यः सारसंग्रहरूपः। भरतः, दण्डी, भामहः, वामनः, आनन्दवर्धनः अन्ये तादृशाः प्राचीनाचार्याश्च प्रथम विभागसंबद्धाः। विद्यानाथविद्याधरादयः अर्वाचीनाः द्वितीयविभागेन संबद्धाः। काव्यात्मनिरूपणे ये स्वं स्वं नूतनं स्वतन्त्रं सिद्धान्तं स्थापयितुं प्रयेतिरे ते मौलिकाः भवन्ति; ये तु प्राचीनैः प्रतिभाशालिभिः आलङ्कारिकैः प्रतिपादितान् उच्चावचान् विषयान् स्वे ग्रन्थे संजगृहुः ते सारसंग्रहकर्तारो भवन्ति। मम्मटविश्वनाथप्रभृतयः ये अलङ्कारवाङ्मयाम्बरे ध्रुवतारावत् विद्योतन्ते ते एतदुभयान्तःपातिनो भवन्ति। काव्यप्रकाशः अलङ्कार-शास्त्रप्रमेयपरीक्षानिकषोपलः। असंख्याकानि व्याख्यानानि अस्य जन-प्रियतां प्रामाणिकतां च उद्घोषयन्ति। परं तु जगन्नाथपण्डितराजः मम्मट-प्रतिपादितान् बहूनंशान् सूक्ष्मेक्षिकया विममर्श; विमतान् निराचकार। कुशा-ग्रीया प्रज्ञा उपज्ञा च अस्य ग्रन्थकर्तृणां मध्ये अग्रगण्यतां समपादयताम्। "रसो वै सः, रसँह्येवायं लब्ध्वाऽऽनन्दी भवति" इत्यादिश्रुतिवचनोपोद्-बलितः एतदीयः रसनिरूपणपरो ग्रन्थः यदि सूक्ष्मं विभाव्यते तत्र अस्य मार्गदर्शी श्रीवत्सलाञ्छन इति भाति॥

स एव श्रीवत्सलाञ्छनः अस्य काव्यामृतस्य प्रबन्धा। एतदीयानां ग्रन्थानां समाप्तिगद्यभागेभ्यः इदं ज्ञायते यत् निखिलशास्त्रपारीणस्य महामहो-पाध्यायबिरुद्भूषणस्य सुगृहीतनामधेयस्य विष्णुधराचार्यस्य पुत्रोऽयमिति। अयं स्वगुरोरभिधानं, स्ववृत्तान्तं वा तदीयत्वेन अद्ययावत् ज्ञातेषु ग्रन्थेषु न निर्दि-शति। अयं भगवति रामचन्द्रे दृढाभक्ति रिति तद्ग्रन्थपरिशीलनेन प्रतीयते। एतद्रचिताः ग्रन्थाः (1) काव्यप्रकाशव्याख्या सारबोधिनी (2) काव्यपरीक्षा (3) रामोदयनाटकं चेति ज्ञायते। सारबोधिनी, रामोदयनाटकञ्च अद्यावधि

न मुद्रिते। केवलं काव्यपरीक्षा डा. पि. यल्. वैद्यमहोदयेन संस्कृता प्रकाशिता च। सम्प्रति तु काव्यामृतं संस्कृत्य प्रकाश्यते॥

डा. वैद्यमहोदयेन अस्य कालः क्री. प. 1323-1380 इति निरणायि। सः काव्यामृतं न लेभे। तत्तु परीक्ष्य अस्य कालः अन्यथा नेतव्यो भवति। काव्यामृते गौडभूपतेः मुकुन्दस्य प्रशस्तिपरौ द्वौ श्लोकौ उपलभ्येते। ततः अयं कविः श्रीमुकुन्दस्य समकालिको वा अर्वाक्कालिको वा भवितु मर्हति। क्री. प. 1558 संवत्सर मारभ्य 1568 संवत्सरपर्यन्तः अस्य श्रीमुकुन्दस्य शासनकालः। जगन्नाथः श्रीवत्सलाञ्छनं स्वकीये ग्रन्थे उदाजहार। अस्य कालस्तु क्री. प. 1620-1660. अतः उभयो रेतयो र्मध्यकाले श्रीवत्सोऽय मवात्सीदिति निश्चीयते। कालनिर्णयादिविषयको विस्तृतो विचारः आंग्लभाषामये उपोद्घाते द्रष्टव्यः॥

अयं प्रायशः मम्मटमेव अनुसरन् तदीयाः कारिकाः तेन उद्धृतानि उदाहरणानि च स्वय मुपादत्ते। यत्र तु सिद्धान्तभेदोऽस्ति तत्र मम्मटवचनं निराकृत्य अन्यदीयं वचनं वा उररीकरोति, सर्वात्मना विनूत्नं वा सिद्धान्तं स्ववाचा प्रकटीकरोति। काव्यप्रकाशीयं काव्यलक्षणं निरस्य भोजराजीयं लक्षणं अङ्गीकरोति॥

इदं काव्यामृतं सप्तभिः उल्लासैः विभक्तम्। तत्र प्रथमोल्लासे काव्यलक्षणं मम्मटोक्तं निरासे। द्वितीये शब्दार्थयोः स्वरूपनिरूपण मकारि। तृतीये ध्वनिसिद्धान्तः निराचक्रे। अयं चतुर एव शृङ्गारवीरहास्याद्भुतान् रसा नङ्गीकरोति। चतुर्थे गुणीभूतव्यङ्ग्यं निरूपयति। पञ्चमे दोषान् निरूपयितुं प्रवृत्तः प्राचीनैः आलङ्कारिकैः प्रतिपादितान् दोषान् लक्षयन्नपि केषाञ्चन अदोषत्वं केषा ञ्चन अन्तर्भावं च साधयति। षष्ठः गुणप्रपञ्चपरः। अत्र गुणत्रितयपक्षं निराकृत्य ततः प्राचीना ननुरुन्धानः दश अपि गुणान् स्वीकरोति। अन्तिमे शब्दगता नर्थगतांश्च अलङ्कारान् वर्णयन् केषा ञ्चन अलङ्कारत्वं प्रतिषिध्य केषा ञ्चन अन्यत्र अन्तर्भाव मपि साधयति॥

केचन विशेषाः –

1. अयं ग्रन्थकर्ता मम्मटोक्तं काव्यलक्षणं सन्दूष्य सरस्वतीकण्ठाभरणोक्तं लक्षणं प्रस्तौति ।
2. 'भद्रात्मनः' इति 'भ्रम धार्मिक' इति च आरब्धे श्लोकद्वितये अन्यैः कथितान् अर्थविशेषान् अनुमानेनैव गतार्थयन् व्यञ्जनां निराकरोति ।
3. शृङ्गारादीन् चतुर एव रसान् अङ्गीकृत्य प्राचीनै रभ्युपेता नन्यान् जहाति ।
4. ध्वनिभेदनिरूपणेऽपि स्वीय मसाधारणं बुद्धिविलसितं प्रतिभासयति ।
5. केषा ञ्चन दोषाणां सर्वथा अदोषत्वं केषा ञ्चन काव्याकाव्यसाधारण्येन काव्यमात्रविषयत्वे अनौचित्यं च निरूपयति । उक्तेष्वेव दोषे ष्वन्येषा मन्तर्भावं प्रतिपाद्य भयजननीं दोषसंख्यां ह्रासयति ।

यद्यपि अयं काव्यामृते काव्यलक्षणं न कण्ठरवेण ब्रवीति तथापि काव्यपरीक्षायां 'काव्य मास्वादजीवातुः पदसंदर्भ उच्यते' इति ब्रुवाणः चण्डीदासस्य 'आस्वादजीवातुः पदसंदर्भः काव्यम्' इति लक्षणं अनुगृह्णातीव ॥

ग्रन्थेऽस्मिन् प्रदर्शितां असाधारिणीं स्वतन्त्रां निरूपणसरणिं सारं सारं अमुं संशोध्य प्रकाशयितुं उत्सुकितेन मया मातृकाग्रन्थानां बहूनां सम्पादने प्रायत्यत । परंतु श्री वेङ्कटेश्वरविश्वविद्यालयलिखितग्रन्थालये कागजपत्रात्मक एक एव ग्रन्थः अलाभि । पूना नगरस्थायाः भारतीयेतिहाससंशोधनमण्डल्याः कागजपत्रात्मकं पुस्तकं अन्यत् अलम्भि । तादृशमेव तिरुवान्कूर पुरस्थात् ग्रन्थालयात् अन्यच्च समासाद्य तत्साहाय्येन ग्रन्थस्यास्य परिशोधनकृत्यं यथामति निर्वर्त्य मुद्रयित्वा विदुषां तोषाय करकमलयोरिदं काव्यामृत मुपहारीक्रियते ॥

ग्रन्थगौरवाद्वा मातृकाग्रन्थदौर्लभ्याद्वा मानुषप्रज्ञायाः परिमितत्वाद्वा अत्र अपरिहार्याः केचन दोषाः प्रविष्टाः स्युः । तान् विद्वद्भिः सूचितान् द्वितीयसंस्करणे परिहरिष्यामीति निवेदयामि ॥

# ABBREVIATIONS

| | | |
|---|---|---|
| 1. अ. रा | अनर्घराघवम् | |
| 2. अ. श | अमरुतशकम् | वेदंवेङ्कटरायशास्त्रि |
| 3. उ. रा | उत्तररामचरितम् | |
| 4. कप्प० | कप्पणाभ्युदयम् | |
| 5. का० | काव्यादर्शः | ed. बेल्वाल्कर् |
| 6. का. प्र | काव्यप्रकाशः | ed. झल्कीकर |
| 7. किरा० | किरातार्जुनीयम् | |
| 8. कुट्टि० | कुट्टिनीमतम् | |
| 9. कु. सं | कुमारसंभवम् | |
| 10. गा. स. | गथासप्तशती | |
| 11. गी. गो | गीतगोविन्दम् | निर्णयसागर् |
| 12. ध्व. अ | ध्वन्यालोकः | ed. निर्णयसागर् |
| 13. नव० | नवसाहसाङ्कचरितम् | |
| 14. ना० | नागानन्दम् | |
| 15. नै० | नैषधम् | |
| 16. प्र. रा. | प्रसन्नराघवम् | |
| 17. बा. रा. | बालरामायणम् | |
| 18. भट्टि० | भट्टिकाव्यम् | |
| 19. भ. श. | भल्लटशतकम् | |
| 20. भो. प्र | भोजप्रबन्धः | |
| 21. म. भा. | महाभारतम् | ed. गोरखपुर |
| 22. म. वी. च. | महावीरचरितम् | |
| 23. मा. मा. | मालतीमाधवम् | |
| 24. मुद्रा० | मुद्राराक्षसम् | |

| | | | |
|---|---|---|---|
| 25. | रघु० | रघुवंशम् | |
| 26. | रत्ना० | रत्नावली | |
| 27. | रु. का. अ | रुद्रटकाव्यालङ्कार: | ed. दुर्गाप्रसाद् निर्णयसागर् |
| 28. | व. जी० | वक्रोक्तिजीवितम् | ed. यस्.के.डे. |
| 29. | वा-सू० | वामनकाव्यालङ्कार-सूत्राणि | ed. चौखाम्बा |
| 30. | वा. स | वासवदत्ता | |
| 31. | विक्र० | विक्रमोर्वशीयम् | |
| 32. | वि. सा. भ. | विद्धसालभञ्जिका | |
| 33. | वे. सं | वेणीसंहारम् | |
| 34. | वै. श. | भर्तृहरिवैराग्यशतकम् | |
| 35. | व्य. वि. | व्यक्तिविवेक: | ed. गणपतिशास्त्री |
| 36. | शा० | शाकुन्तलम् | |
| 37. | शि. व. | शिशुपालवधम् | |
| 38. | स. क. भ. | सरस्वतीकण्ठाभरणम् | निर्णयसागर् |
| 39. | सु. र. | सुभाषितरत्नावली | |
| 40. | हनु० | हनुमन्नाटकम् | |

| | |
|---|---|
| K.P. | Kāvya Prakāśa |
| K.Pa. | Kāvyaparīkṣā |
| K.P.K. | Kāvyaprakāśa-khaṇḍanam |
| KM | Kāvyāmṛtam |
| MS | Manuscript |
| N.S. | Nātya Śāstra |
| Taitt. Up. | Taittirīya Upaniṣad. |

# विषयानुक्रमणिका

## प्रथमोल्लासः


| | | पृष्ठः |
|---|---|---|
| 1. ग्रन्थकरणप्रतिज्ञा | .... | 1 |
| 2. ग्रन्थकरणोद्देशः | .... | 1 |
| 3. "नियतिकृत" इति श्लोकस्य परामर्शः | .... | 1 |
| 4. काव्यफलम् | .... | 2 |
| 5. काव्यकारणम् | .... | 2 |
| 6. काव्यलक्षणम् | .... | 2 |
| 7. काव्यभेदाः | .... | 3 |


## द्वितीयोल्लासः


| | | |
|---|---|---|
| 8. शब्दार्थस्वरूपाभिधानम् | .... | 5 |
| 9. शब्दार्थयोः विभागः | .... | 5 |
| 10. शक्तिनिरूपणम् | .... | 5 |
| 11. लक्षणानिरूपणम् | .... | 5 |
| 12. लक्षणाविभागः | .... | 5 |
| 13. व्यञ्जनानिरासः | .... | 6 |
| 14. व्यङ्ग्यप्रतीत्युपायाः | .... | 8 |


## तृतीयोल्लासः


| | | |
|---|---|---|
| 15. ध्वनिभेदाः | .... | 9 |
| 16. रसस्वरूपनिरूपणम् | .... | 9 |

17. प्राचां मतेन रसभेदाः .... 11
18. स्थायिभावनिर्देशः 11
19. शृङ्गाररसभेदाः .... 11
20. हास्यरसः 11
21. अद्भुतरसः .... 11
22. करुणादीनां रसत्वनिरासः 12
23. बीभत्सस्य ,, 13
24. भयानकस्य ,, .... 13
25. शान्तस्य ,, 13
26. वीररौद्रयो रैक्यप्रतिपादनम् .... 13
27. दानवीरादीनां रसत्वनिरासः 13
28. वात्सल्यादीनां ,, 13
29. भावस्वरूपकथनम् 14
30. व्यभिचारिभावानां नामानि .... 15
31. रसाभासभावाभासौ 15
32. भावस्य शान्त्युदयसन्धिशबलताः 16
33. भावशान्त्यादीनां अङ्गित्वसिद्धिः .... 17
34. अनुरणनध्वनिः, तद्भेदाश्च 17
35. शब्दशक्त्युद्भवध्वनिः, तद्भेदौ च .... 18
36. अर्थशक्त्युद्भवध्वनिः, तद्भेदाश्च 18
37. उभयशक्तिमूलध्वनिः .... 19
38. पदैकदेशरचनावर्णानां व्यञ्जकत्वम् .... 20

## चतुर्थोल्लासः

39. परमतेन गुणीभूतव्यङ्ग्यभेदकथनम् .... 23
40. स्वमते गुणीभूतव्यङ्ग्यस्य त्रिप्रकारतानिरूपणम् .... 23

## पञ्चमोल्लासः


41. दोषस्वरूपकथनम् .... 26
42. च्युतसंस्कृत्यादीनां अदोषत्वकथनम् .... 26
43. पददोषगणनम् .... 26
44. श्रुतिकटुताया अदुष्टत्वम् .... 26
45. च्युतसंस्कृते रदोषत्वसमर्थनम् .... 27
46. निहतार्थस्य अदुष्टता .... 27
47. अप्रयुक्तस्य ,, .... 27
48. असमर्थस्य ,, 28
49. निरर्थकानुचितार्थाश्लीलाविमृष्टविधेयांशसन्दिग्धाप्रतीत क्लिष्टविरुद्धमतिकृतां दोषतापादनं अचारु .... 28
50. निरर्थकम् .... 28
51. अनुचितार्थम् 28
52. त्रिविधमश्लीलम् .... 28
53. अविमृष्टविधेयांशम् .... 29
54. सन्दिग्धम् .... 29
55. अप्रतीतम् .... 29
56. क्लिष्टम् .... 29
57. विरुद्धमतिकृत् .... 29
58. ग्राम्यस्यादुष्टता .... 29
59. नेयार्थस्यादुष्टता .... 29
60. अवाचकस्यादुष्टता .... 30
61. वाक्यदोषाणां नामतो निर्देशः 30
62. प्रतिकूलवर्णम् - तस्य अदुष्टता .... 30
63. उपहतलुप्तविसर्गम् 31
64. विसन्धि .... 31

65. हतवृत्तम् 31

66. पूर्वोक्तदोषत्रयस्य गुणाभावरूपत्वमेव न स्वतो दोषत्वम् .... 31

67. न्यूनपदम् 32

68. अधिकपदम् 32

69. कथितपदम् .... 32

70. एतेषां त्रयाणां काव्यमात्रविषयत्व मयुक्तम् 32

71. पतत्प्रकर्षम् .... 32

72. अस्य समताख्यगुणाभावरूपत्वम् 32

73. समाप्तपुनरात्तकम् 33

74. अस्य अदुष्टता 33

75. अर्थान्तरैकवाचकम् .... 33

76. नायमधिको दोषः, अस्थानस्थपदेऽन्तर्भावात् .... 33

77. अभवन्मतयोगम् .... 33

78. अस्य काव्यमात्रविषयत्व मयुक्तम् .... 34

79. अनभिहितवाच्यम् 34

80. अस्य न्यूनपदेऽन्तर्भावः 34

81. अपदस्थपदम् .... 34

82. अस्य काव्यमात्रविषयत्व मनुचितम् .... 34

83. अपदस्थ समासम् .... 34

84. इदमनुचितम् - समासव्यञ्जकताया असर्वसम्मतत्वात् .... 34

85. सङ्कीर्णम् 34

86. गर्भितम् .... 34

87. अक्रमम् .... 35

88. एते त्रयः न पृथग्दोषाः, अपदस्थपदेऽन्तर्भावात् 35

89. प्रसिद्धिहतभग्नप्रक्रमामतपरार्थानां अनुचितार्थेऽन्तर्भावात्
न ते पृथग्दोषाः .... 35

90. प्रसिद्धिहतम् .... 35
91. भग्नप्रक्रम: 35
92. अमतपरार्थ: .... 35
93. अर्थदोषाणां नामोल्लसनम् .... 35
94. अर्थदोषाणां पूर्वोक्तेषु पदादिदोषेष्वन्तर्भावात् न पृथग् गणनमुचितम् – अत्रविचार: .... 36
95. अपुष्ट: .... 36
96. कष्ट: .... 36
97. अस्य क्लिष्टेऽन्तर्भावस्समुचित: .... 37
98. व्याहत: (अनुचितार्थेऽन्तर्भाव:) .... 37
99. दुष्क्रम: ,, .... 37
100. ग्राम्य: ,, .... 37
101. प्रसिद्धि विरुद्ध: ,, .... 37
102. विधाविरुद्ध: ,, .... 37
103. अपदयुक्त: ,, .... 38
104. अश्लील: ,, .... 38
105. सहचरभिन्न: ,, .... 38
106. अनुवादायुक्त: ,, .... 39
107. प्रकाशितविरुद्ध: ,, .... 39
108. सन्दिग्ध: (सन्दिग्धपददोषेऽन्तर्भाव:) .... 39
109. अनवीकृत: .... 39
110. निर्हेतु: (न्यूनपदेऽन्तर्भाव्य:) .... 39
111. विशेषपरिवृत्त: ,, .... 40
112. अविशेषपरिवृत्त: (अधिकपदेऽन्तर्भाव्य:) .... 40
113. साकाङ्क्ष: (न्यूनपदेऽन्तर्भाव्य:) 41
114. नियमपरिवृत्त: ,, .... 41

115. विध्ययुक्तः (अविमृष्टविधेयांशेऽन्तर्भावः) 41
116. त्यक्तपुनः स्वीकृतः (समाप्तपुनरात्तेऽन्तर्भाव्यः) .... 42
117. रसदोषाणां निर्देशः 42
118. व्यभिचारिणः स्वशब्देनोपादानम् 42
119. स्थायिनः ,, .... 43
120. व्यभिचार्यादेः स्वशब्दवाच्यत्वं दोषो न, अपि तु गुणः .... 44
121. कष्टकल्पनया व्यक्तिः (क्लिष्टेऽन्तर्भाव्यः) 44
122. प्रतिकूल विभावादिग्रहः 44
123. पुनः पुनः दीप्तिः 44
124. अकाण्डे प्रथनम् 44
125. अकाण्डे छेदः 45
126. अङ्गस्यातिविस्तृतिः 45
127. अङ्गिनोऽननुसन्धानम् 45
128. प्रकृतीनां विपर्ययः .... 45
129. अनङ्गस्याभिधानम् 45
130. प्रतिकूलविभावत्वादीनां अनुचितार्थेऽन्तर्भावः 45

**षष्ठोल्लासः**

131. गुणस्वरूपनिरूपणम् 46
132. गुणानां रसधर्मत्वकथनम् 46
133. गुणानां मौलिको धर्मः त्रिविधः .... 46
134. माधुर्यम् 46
135. ओजः 46
136. प्रसादः 46
137. गुणानां शब्दार्थवृत्तिताऽपि 47
138. गुणानां व्यञ्जकाः 47
139. माधुर्यव्यञ्जका वर्णाः .... 47

140. इयमेव घटना वैदर्भी .... 47
141. ओजो व्यञ्जका वर्णाः .... 47
142. इयमेव घटना गौडी .... 47
143. अनेवं विधा उभयरूपा घटना पाञ्चाली .... 47
144. गुणानां शब्दार्थ वृत्तित्वसाधनम् .... 48
145. काव्यप्रकाशखण्डितानां गुणानां पुनरुज्जीवनम् 48
146. गुणदशकस्य नामकीर्तनम् .... 48
147. श्लेषः .... 48
148. समाधिः .... 48
149. उदारता .... 49
150. पूर्वोक्तानां ओजस्यन्तर्भावः न युक्तः .... 49
151. प्रसादः .... 49
152. अर्थव्यक्तिः .... 50
153. समता .... 50
154. माधुर्यम् .... 50
155. सुकुमारता .... 51
156. कान्तिः .... 51
157. अर्थगुणाः .... 52
158. श्लेषः .... 52
159. ओजः प्रसाद-माधुर्य सुकुमारतोदारतानां पृथग्गुणत्व-
स्थापनम् 53
160. प्रसादः 53
161. माधुर्यम् 53
162. सौकुमार्यम् 53
163. उदारता .... 53
164. ओजः, तद्भेदाः .... 53

165. समता .... 54
166. अर्थव्यक्तिः .... 54
167. कान्तिः 55
168. समाधिः 55

## सप्तमोल्लासः

169. शब्दालङ्काराः .... 56
170. वक्रोक्तिः । तद्भेदौ .... 56
171. छेकानुप्रासः 56
172. वृत्यनुप्रासः 56
173. लाटानुप्रासः 57
174. यमकम् .... 57
175. श्लेषः .... 58
176. चित्रम् (खड्गबन्धः) .... 59
177. पुनरुक्तवदाभासः 59
178. उपमा 60
179. अनन्वयः .... 60
180. उपमेयोपमा .... 60
181. अनयो रुपमातः अभिन्नता 61
182. उत्प्रेक्षा .... 61
183. अत्र व्यङ्ग्योपमालङ्कारः .... 61
184. ससन्देहः 61
185. अत्रापि व्यङ्ग्योपमैवालङ्कारः 62
186. रूपकम् .... 62
187. इहापि व्यङ्ग्योपमैवालङ्कारः .... 63
188. अपह्नुतिः .... 63

189. श्लेष: .... 63

190. इहापि व्यङ्ग्योपमैवालङ्कार: .... 63

191. समासोक्ति: .... 64

192. अत्र व्यङ्ग्योपमालङ्कार: .... 64

193. निदर्शना .... 64

194. अत्र व्यङ्ग्योपमालङ्कार: .... 64

195. द्वितीया निदर्शना .... 65

196. व्यङ्ग्योपमालङ्कार: .... 65

197. अप्रस्तुतप्रशंसा .... 65

198. अत्र व्यङ्ग्योपमा 66

199. अतिशयोक्ति:, तद्भेदाश्च .... 66

200. तद्भेदानां यथायथं व्यङ्ग्येषु उपमाव्यतिरेकविरोधालङ्कारेष्वन्तर्भाव: .... 66

201. प्रतिवस्तूपमा .... 67

202. अत्र व्यङ्ग्या उपमालङ्कार: .... 67

203. दृष्टान्त: .... 67

204. अत्र उपमाव्याङ्ग्यालङ्कार: .... 67

205. स्मरणम् .... 67

206. भ्रान्तिमान् .... 67

207. उभयत्रापि उपमाव्यङ्ग्यालङ्कार: .... 67

208. दीपकम्, तद्भेदौ च .... 68

209. प्रथमस्य व्यङ्ग्योपमारूपत्वम् .... 68

210. द्वितीयस्य अलङ्काराभासत्वम् .... 68

211. मालादीपकम् .... 68

212 अस्य उदारतायां अर्थगुणेऽन्तर्भाव: .... 69

213. तुल्ययोगिता .... 69

214. अस्याप्यलङ्काराभासत्वमेव 69
215. व्यतिरेक: 69
216. प्रतीपम् – चतुर्विधम् 69
217. भेदद्विकस्य व्यतिरेकेऽन्तर्भाव: 70
218. तृतीयचतुर्थयो: उदारताख्यार्थगुणेऽन्तर्भाव: .... 70
219. विभावना .... 70
220. अस्य विरोधाभासत्व मुचितम् 71
221. विशेषोक्ति: .... 71
222. अस्या विरोधेऽन्तर्भाव: 71
223. यथासंख्यम् 71
224. अस्य समताया मर्थगुणेऽन्तर्भाव: 71
225. अर्थान्तरन्यास: 71
226. विरोध: 72
227. असङ्गति: 72
228. अस्या विरोधेऽन्तर्भाव: 72
229. व्याघात: .... 72
230. अस्य विरोधेऽन्तर्भाव: .... 73
231. स्वभावोक्ति: .... 73
232. व्याजस्तुति: .... 73
233. सहोक्ति: 73
234. अस्या: द्वितीयसमुच्चयेऽन्तर्भाव: 73
235. विनोक्ति: .... 73
236. परिवृत्ति: 74
237. भाविकम् 74
238. काव्यलिङ्गम् .... 75
239. समुच्चय: 75

240. समाधिः .... 75
241. कारणमाला .... 75
242. काव्यहेतुः .... 75
243. एषां चतुर्णां काव्यलिङ्गेऽन्तर्भावः .... 75
244. पर्यायोक्तम् .... 76
245. अस्य उतारतायामन्तर्भावः .... 76
246. उदात्तम् .... 76
247. अस्य अतिशयोक्तौ अन्तर्भावः .... 76
248. उदात्तद्वितीयभेदस्य नालङ्कारता रसस्यैव साम्राज्यात् 76
249. समुच्चयः (द्वितीयो भेदः) .... 77
250. अत्र रसादेः चमत्कारित्वान्नालङ्कारित्वम् पूर्ववदन्तर्भावो वा .... 77
251. पर्यायः 77
252. अनुमानम् .... 77
253. परिकरः .... 77
254. व्याजोक्तिः .... 78
255. परिसंख्या .... 78
256. अत्र रसस्यैव चमत्कारित्वान्नाऽलङ्कारता .... 78
257. अन्योन्यम् .... 78
258. उत्तरम् .... 79
259. इदमनुमानेऽन्तर्भूतम् .... 79
260. द्वितीयस्य उत्तरस्य प्रश्नपरिसंख्यायामन्तर्भावः .... 79
261. सूक्ष्मम् .... 79
262. अस्य उदारतायामर्थगुणेऽन्तर्भावः 80
263. सारः ... 80
264. समम् ... 80
265. अत्र व्यङ्ग्योपमैव चमत्कारहेतुः ... 80

266. विषमः, तद्भेदाः ... 80
267. अस्य विरोधेऽन्तर्भावः ... 81
268. अधिकम् (द्विविधम्) 81
269. इदं अधिकं विरोधेऽन्तर्भूतम् 81
270. प्रत्यनीकम् 81
271. अस्यालङ्काराभासत्वम् 81
272. मीलितम् 81
273. अस्य व्यतिरेकेवाऽतिशयोक्तौवाऽन्तर्भावः 82
274. एकावली (द्विविधा) 82
275. अस्यालङ्काराभासत्वम् ... 82
276. विशेषः (त्रिविधः) 82
277. प्रथमभेदस्य विरोधे, द्वितीयस्य पर्याये, तृतीयस्य विरोधेऽति-
शयोक्तौवाऽन्तर्भावः 83
278. तद्गुणः 83
279. अतद्गुणः 83
280. संसृष्टिः 83
281 सङ्करः 84
282. अस्य त्रिरूपता 85

# प्रथमोल्लास:

कमपि प्रबन्ध[1]मथ कौतुकद मलङ्कारदत्तचित्तानाम् ।
तोषाय तार्किकाणां करवै खरवैरिणं नत्वा ॥

परचितकाव्यकण्टकखण्डनशततताण्डवं कुर्मः ।
कवयोऽद्य दुर्दुरूढाः स्वैरं खेलन्तु काव्यगहनेषु ॥

तत्र तावदादौ अनुवादपूर्वकं काव्यप्रकाशखण्डन मारभ्यते –

**नियतिकृतनियमरहितां ह्लादैकमयी मनन्यपरतन्त्राम् ।**
**नवरसरुचिरां निर्मिति मादधती भारती कवे र्जयति ॥** KP. 1. 1.

नियति रदृष्टं तत्कृतो नियम स्तद्रहिता मित्यर्थः । अत एवोक्तम् –

अपारे काव्यसंसारे कविरेकः प्रजापतिः ।
यथास्मै रोचते विश्वं तथैव परिवर्तते ॥ 1

इत्ययमर्थो न साधुः । काव्येऽपि नियमस्य सत्वात् । शब्दे छन्दःप्रभृतिषु नियमस्य सत्वात् । तथा तत्तद्रसविशेषे - तत्तद्रीतिविशेषे तत्तत्प्रबन्धविशेषे भाषाविशेषे च नियमस्य सत्वात् । अर्थे तु मुखादिकं चन्द्रत्वादिनैव वर्णयन्ति, नान्यथेति नियमस्य सत्वात् । अथ 'शब्दार्थौ काव्य' मित्युच्यते । अर्थे तु नित्यानित्यसाधारण्येनादृष्टाजन्यत्वमस्तीतिचेन्न, अर्थे काव्यत्वस्य निराकरिष्यमाणत्वात् । **ह्लादैकमयीमिति** – इदमपि विरुद्धम् । अन्येषां भावानामिव काव्यस्यापि सुखमोहस्वभावत्वात् । **अनन्यपरतन्त्रामिति** - इदमपि न चारु । तथा हि - अत्रान्यपदस्य भारत्यन्यार्थकत्वस्य वक्तव्यत्वे भारत्यन्यस्य कवितत्प्रतिभादेः काव्ये कारणत्वसंभवात् । **नवरसरुचिरामिति** – इदमप्यसाधीयः । बीभत्सादीनां रसत्वस्य निराकरिष्यमाणत्वात् । रसे नवत्वस्यासंभवात् ।

---

1. °मर्थकारणमलङ्कार° MS.

अथ काव्यफलम् –

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥** KP. I. 2.

इद मुपलक्षणम् । काव्यस्य विष्णुस्तवादिरूपतया चतुर्वर्गस्यैव साधनत्वा दिति ।

अथास्य कारणम् –

**शक्ति र्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।**
**काव्यज्ञशिक्षयाभ्यास इति हेतु स्तदुद्भवे ॥** KP. I. 3.

अत्र तस्य काव्यस्योद्भवे निर्माणे समुल्लासे । त्रयः शक्तिनिपुणताभ्यासा हेतु रित्युक्तम् । तदपि तुच्छम् । डिम्भादावपि काव्योत्पत्तिदर्शनात्, शक्तेरेव हेतुत्वात् ।

अथास्य लक्षणम् –

**त ददोषौ शब्दार्थौ सगुणा वनलङ्कृती पुनः क्वापि ॥** KP. I. 4.

अत्रादोषत्वं यत्किञ्चिद्दोषाभाववत्त्वम्, यावद्दोषाभाववत्त्वं च । नाद्यः, अव्यावर्तकत्वात् । नान्त्यः, तथा सति काव्यलक्षणं निर्विषयं विरलविषयं वा स्या दितिचेन्न । उच्यते – एकस्मिन् पद्ये यदंशे दोषाभावः तदंशे काव्यत्वं, यदंशे दोष स्तदंशेऽकाव्यत्व मि त्यत्र दोषसामान्याभाव एव वाच्यः । **सगुणाविति**-गुणव्यञ्जकावित्यर्थः । गुणानां रसैकधर्मत्वात् शब्दार्थयोः सगुणत्वाभावात् । **अनलङ्कृतीति** - सालङ्कारावित्यर्थः । अत्रेदं बोध्यम् – काव्यपदप्रवृत्ति-निमित्तं चमत्कारजीवातुतावच्छेदकम् ।

अदोषं गुणव त्काव्य मलङ्कारै रलङ्कृतम् ।
रसान्वितं कविः कुर्वन् कीर्तिं स्वर्गं च विन्दति ॥ 2

इति प्रतिपादितस्वर्गविशेषजनकतावच्छेदकं च काव्यत्व मखण्डोपाधि रवश्यं वाच्यम् । तदेव लक्षण मस्तु, किमनेनाननुगतेन लक्षणेन । यदपि "काव्यत्वं शब्दार्थवृत्ती" ति तदपि तुच्छम् । काव्यं पठति, काव्यं शृणोतीत्यादि

व्यवहारबला दवश्यं शब्दे काव्यत्वं कल्पनीयम्। अर्थे च प्रमाणाभावाच्छब्दार्थोभयवृत्तित्वकल्पने गौरवाच्च कथं काव्यत्वं कल्पनीयमिति। न चास्वादजीवातुत्वा दर्थे काव्यत्व मिति वाच्यम्। आस्वादजीवातूनामन्येषां बहूनां सत्वा त्तेष्वपि काव्यत्वापत्तेः।

अथ तद्भेदाः –

**इद मुत्तम मतिशयिनि व्यङ्ग्ये वाच्या[1]द्बुधै र्ध्वनिः कथितः॥**
KP. I. 4.

**अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्।**
**शब्दचित्रं वाच्यचित्र मव्यङ्ग्यं त्ववरं स्मृतम्॥** KP. I. 5.

अतिशयिनि चमत्कारकारिणि; अतादृशि वाच्या दनतिशायिनि। अव्यङ्ग्यं स्फुटप्रतीयमानव्यङ्ग्यरहितम्। ननु काव्यस्य ध्वनित्वादिना यः कृतो विभागः स च नोपपद्यते। तथा हि। एतेषु त्रिषु सर्वत्र रसादिकं प्रतीयते न वा। नान्त्यः, तदा यत्र न प्रतीयते तत्र काव्यत्वविरहापत्तेः। नाद्यः, तदा कथं ध्वनित्वादिना विभागः? न च मध्यमाऽऽन्तरालिकव्यङ्ग्यस्य प्राधान्या द्विभाग इति वाच्यम्। आन्तरालिकव्यङ्ग्यस्याप्राधान्येऽपि तस्याकिञ्चित्करत्वेन चमत्कारापेक्षया सर्वेषां ध्वनित्वसंभवात्। अथ चित्रगुणालङ्काराहितचमत्कारेण रस स्तिरोधीयत इति चित्रत्व मितिचेन्न। अनवबोधात्। तथा हि – तिरोधीयत इत्यस्य कोऽर्थः। रसादेः प्रतीतिप्रतिबन्धो, विलम्बेन प्रतीतिर्वा। नाद्यः, तथासति काव्यत्वविरहापत्तेः। नान्त्यः, गुणालङ्कारा हि रसोद्बोधकाः। तथा च [2]तज्जाततदाहितचमत्कारानन्तरं रसोद्बोधो युज्यत एवेति कथं न ध्वनित्वम्। अत एव रसध्वनावपि गुणालङ्काररचना साधीयसी महाकवीनां दृश्यते। यथा –

1. ध्वनिर्बुधैः। KP.
2. ज्ञान....(क)

गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः ।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥ 3

यथा वा –

यान्त्या मुहुर्वलितकन्धरमाननं त-
दावृत्तवृन्तशतपत्रनिभं वहन्त्या ।
दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या
गाढं निखात इव मे हृदये कटाक्षः ॥ 4

ननु तर्हि –

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा
मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः ।
भिद्या दुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुम
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥ 5

इत्यादावपि पूर्वोक्तयोः पद्ययोरिव रसादिध्वनित्वे उत्तमत्वं स्या दितिचे न । अनुप्रासाना मसमीचीनत्वेन तथाविधगङ्गाविषयकभावोत्कर्षवर्णनाविरहाच्च अनुत्तमत्वात् । अत एव महिमभट्टाना मस्मिन् मत एव पक्षपातः ॥

॥ इति काव्यामृते प्रथम उल्लासः ॥

# द्वितीयोल्लासः

अथ शब्दार्थयोः स्वरूप मभिधत्ते विभागतः –

**स्या द्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जक स्त्रिधा ।** KP. II. 6.
**[1]तेषा मर्था स्तथा वाच्य लक्ष्य व्यङ्ग्या इति त्रयः ॥**

स्याम् ।

अथ तेषां स्वरूपम् –

**शक्तिमत्वं वाचकत्वं शक्ति र्जातौ परं मता ।**[2]

यत्र यस्य शक्ति स्तत्र स तस्य वाचकः इत्यर्थः । **जाताविति-** आकाशादि पदेषु जात्यभावा देकव्यक्तिकेषु व्यक्तावेव शक्तिः ।

**[3]मुख्यार्थान्वयबाधे स्यादन्यार्थप्रतिपत्तिकृत् ।**
**लक्षणा शक्यसंबन्धो रूढितोऽथ प्रयोजनात् ॥**

अत्र प्रयोजनवती लक्षणा द्विधा । एका उपादानरूपा, अन्या लक्षणरूपा शुद्धा । एते क्रमेण अजहत्स्वार्था जहत्स्वार्था च । तथा सारोपा साध्यवसाना च शुद्धा गौणी च । अथ क्रमेण तयोः स्वरूपम् । सा सारोपा यत्र विषयी विषयश्च अनपह्नुतवैधर्म्यौ सामानाधिकरण्येन निर्दिश्येते ।

अथ साध्यवसायिका यत्र विषयोऽसाधारणधर्मेण नोच्यते विषय्येवोच्यते । परस्परं च तादात्म्याध्यासः ।

---

1. This line is not found in KP.

2. KPa. gives the full text :
ईश्वरेच्छाविशेषोऽस्य पदार्थान्तरमेव सा ॥

3. KP gives the verse –
मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्योऽर्था लक्ष्यते यत्सा लक्षणारोपिता क्रिया ॥ II. 9.

**भेदाविमौ च सादृश्यात् सम्बन्धान्तरत स्तथा ।**
**गौणौ शुद्धौ च . . . .** KP. II. 12.

यथा गौर्वाहीकः गौरेवायम्, आयुर्घृतं आयुरेवेदम् ।

[1]शब्दोऽत्र व्यञ्जक इति । इद मनुपपन्नम् । व्यञ्जनायां प्रमाणाभावात् । तथा हि – यत्र लक्षणामूलध्वनि रभ्युपगम्यते तत्र तात्पर्यानुपपत्त्या शैत्यपावनत्वादिविशिष्टतीरे लक्षणया विशिष्टार्थप्रतीति र्भविष्यति । तदर्थं किं व्यञ्जनाकल्पनेन ? न च शक्यस्य विशिष्टेन सम्बन्धाभावात् कथं विशिष्टे लक्षणेति वाच्यम्, यत्किञ्चिदेकसंबन्धस्य एकविषयत्वादेर्वक्तुं शक्यत्वात् । अभिधामूलध्वनौ तु नानार्थस्थले –

भद्रात्मनो दुरधिरोहतनोर्विशाल-
वंशोन्नतेः कृतशिलीमुखसंग्रहस्य ।
यस्यानुपप्लुतगतेः परवारणस्य
दानांबुसेकसुभग स्सततं करोऽभूत् ॥ 6

इत्यादौ राजगजोभयार्थ एव फलबला त्तात्पर्यग्रहा दुभयार्थप्रतीति र्भविष्यति किं व्यञ्जनया । नानार्थादन्यत्र तु मुख्यार्थबाधेऽपि तत्तदर्थेषु रसादितात्पर्यानुपपत्त्या पूर्ववल्लक्षणैव । अस्मिन् पक्षे रूढिरिव विना प्रयोजनं लक्षणे त्यवधेयम् । यत्तु तत्तद्वर्णानां तत्तद्रसव्यञ्जकतया व्यञ्जना अवश्यमाश्रयणीयेति, तदतीव तुच्छम् । अभ्युपगमपराहतत्वात् । वस्तुतो नाट्यादिदर्शनजन्यसुखविशेषस्यैव रसत्वस्य वक्ष्यमाणत्वेन तस्य व्यङ्ग्यत्वाभावा दपि तु साक्षात्कारविषयत्वात् । अथ रुचिं कुरु इत्यादौ असभ्यार्थोपस्थापकत्वा द्व्यञ्जनास्वीकार्येति चे न्न । अपभ्रंशान्तरवत्तस्यापि तदर्थोपस्थापकत्वात् । अथ,

द्वयं गतं संप्रति शोचनीयतां
समागमप्रार्थनया कपालिनः
कला च सा कान्तिमती कलावत-
स्त्वमस्य लोकस्य च नेत्रकौमुदी ॥ 7

1. अथव्यञ्जको निरूप्यते – (क)

इत्यत्र पिनाक्यादिपदवैलक्षण्येन कपाल्यादिपदानां व्यञ्जनां विना शिवनिन्दाबोधकत्वाभावात् कथं काव्यानुगुणत्व मिति चे न्न। तत्र योगबलात् कपालिपदस्य कापालित्वरूपशिवनिन्दाप्रत्यायकत्वेन काव्यानुगुणत्वात्। वस्तुतस्त्वनुमानेनैव व्यञ्जनाऽन्यथासिद्धा। तथा हि –

[1]भम धम्मिअ वीसद्धो सो सुणओ अज्ज मारिओ देण।
गोलाणईकच्छकुडङ्गवासिणा दरिअसीहेण॥ ४

इत्यत्र गृहे भयहेतुश्वनिवृत्तिजन्यभ्रमणविधानेन गोदावरीतीरस्य सिंहवत्त्वेन भीरुभ्रमणायोग्यत्वं व्यङ्ग्यम्। तत्तु गोदावरीतीरं भीरुभ्रमणायोग्यं, सिंहवत्वात्, यन्नैवं तन्नैवं, यथा गृह मित्यनुमानेनैव सेत्स्यतीति किमनया व्यञ्जनया। न च भीरुरपि गुरोः प्रभोर्वा निदेशेन प्रियानुरागेण वा भ्रमतीति व्यभिचार इति वाच्यम्। प्रभुनिदेशाद्यनुपाधिकत्वेन भ्रमणस्य विशेषणीयत्वेन व्यभिचाराभावात्। न च प्रतारिकायाः वाक्यत्वेन सिंहवत्त्वं न निश्चित मिति वाच्यम्। प्रतारिकावाक्यादपि तत्त्वाज्ञानदशायां तन्निश्चयोत्पत्तेः। अथ व्यज्यत इति प्रतीत्या व्यञ्जनासिद्धि रिति चेन्न। तस्याः प्रतीते रनुमीयत इति प्रतीत्या सहैकार्थकत्वात्।

अन्ये तु सोऽयमिषोरिव दीर्घदीर्घतरो व्यापार इति, यत्परः शब्दः स शब्दार्थ इति न्यायात् भम धम्मिअ इत्यादौ भ्रमणायोग्यत्वं वाच्यमेव न व्यङ्ग्यम्। न च यत्परः शब्द इत्यादौ यदंशो विधेयः तत्रैव तात्पर्यमित्येवार्थः। यथा दध्ना जुहोतीत्यत्र हवनस्यान्यतः सिद्धे दध्यादेः करणत्वे न तु शब्दश्रवणानन्तरं प्रतीयमान एव तात्पर्यमित्यर्थः। तथा सति पूर्वो धावतीत्यत्रापराद्यर्थेऽपि शब्दप्रामाण्यं स्यादिति वाच्यम्। एवं विवक्षितेऽपि विधेयतया भ्रमणायोग्यत्वेऽपि तात्पर्यस्य वक्तुं शक्यत्वात्। नचैवं लक्षणोच्छेद इति वाच्यम्। लक्ष्येऽर्थे परमतात्पर्याभावात्। अन्यत्रान्यशब्दप्रयोगः

1. भ्रम धार्मिक विश्रब्धः स शुनकोऽद्य मारितस्तेन।
गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन॥

तद्धर्मप्राप्त्यर्थं इति न्यायात् प्रतीयमान एवार्थे परमतात्पर्या दित्याहुः। यदपि नयनभंग्यादेर्व्यञ्जकतेति तदपि न ; तत्र चेष्टाविशेषस्यैवानुमानविधया तत्तदर्थ-प्रत्यायकत्वात् ।

इत्थं संचूर्णिता स्सर्वे व्यञ्जनावृत्तिसाधकाः ।
स्वप्नेऽपि व्यञ्जना तस्मा न्नास्तीति विदुषां स्थितिः ॥

अथ गङ्गायां घोष इत्यादौ शैत्यपावनत्वादि प्रतीतौ उपायमाह –

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ॥ KP. III. 21.

प्रस्तावदेशकालादे वैशिष्ट्या त्प्रतिभाजुषाम् । KP. III. 22.
[1]तत्तदर्थप्रतीति स्स्या दभिधालक्षणादिभिः ॥

आदिशब्दादनुमानपरिग्रहः । बोद्धव्यः प्रतिपाद्यः पतिपादयितव्य इति यावत् । काकु र्ध्वनेर्विकारविशेषः । तत्र वक्तृवैशिष्ट्याद्यथा –

[2]अतिपृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखि त्वरितम् ।
श्रमस्वेदसलिलनिश्वासनिःसहा विश्राम्यामि क्षणम् ॥ 9

अत्र चौर्यरतगोपनं व्यज्यते ।

प्रतिपाद्यवैशिष्ट्या यथा –

उपकृतं बहु तत्र किमुच्यते
सुजनता प्रथिता भवता परम् ।
विदध दीदृशमेव सदा सखे
सुखित मास्स्व तत शरदां शतम् ॥ 10

एत दपकारिणं प्रति विपरीतलक्षणया कश्चि द्वक्ति । अपकारातिशयो व्यङ्ग्यः । एव मन्यानि बोद्धव्यानि ॥

॥ इति काव्यामृते द्वितीय उल्लासः ॥

---

1. This line is not found in KP.
2. अइपिहुलं जलकुंभं घेत्तूण समागदाह्मि सहि तुरिअम् ।
समसेअसलिलणीसासणीसहा वीसमामि खणम् ॥
is the original prakrit reading.

# तृतीयोल्लासः

अथ ध्वनिभेदानाह –

तत्र ध्वनि द्विविधः। अविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्च। अन्यपरं व्यङ्ग्यनिष्ठम्। तत्राद्यस्य द्वौ भेदौ अर्थान्तरसंक्रमितवाच्यात्यन्ततिरस्कृतवाच्यौ। तत्राद्यो यथा –

त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति।
आत्मीयां मति मादाय स्थिति मत्र विधेहि तत्॥ 11

अत्र वच्मि उपदिशामि। तथाचास्य वचनरूपं स्वार्थमपरित्यज्यार्थान्तरस्योपदेशस्य बोधना दर्थान्तरसंक्रमितवाच्यता। स्वार्थमपरित्यज्यापरार्थ बोधन एव तत्वात्।

द्वितीयो यथा – उपकृतमित्यादि। अत्र वाच्यस्य सर्वथाऽन्वये अप्रवेशा दत्यन्ततिरस्कृतवाच्यता। अन्वयाप्रवेश एव हि तिरस्कारः। एवं विवक्षितान्यपरवाच्यस्यापि द्वौ भेदौ। एकोऽसंलक्ष्यक्रमव्यङ्ग्यो द्वितीयः संलक्ष्यक्रमव्यङ्ग्यः इति।

असंलक्ष्यक्रमव्यङ्ग्यः – न खलु विभावानुभावसञ्चारिण एव रसाः। अपि तु रसा स्तैःप्रत्याय्यन्त इति। विभावदेर्व्यञ्जकस्यरसस्य च प्रतीत्या पौर्वापर्यक्रमोऽस्ति। स न लक्ष्यते। आस्वादेन झटिति चित्ताकर्षणात् कालसौक्ष्म्याच्च। तत्र 'रस भाव तदाभास भावशान्त्यादि रक्रम'[1] इति। असंलक्ष्यक्रमव्यङ्ग्य इत्यर्थः। आदिग्रहणा द्भावोदय भावसन्धि भावशबलत्वानि परिगृह्यन्ते।

तत्र रसस्वरूप माह –

**कारणा न्यथ कार्याणि सहकारीणि यानि च।**
**रत्यादेः स्थायिनो लोके तानि चे न्नाट्यकाव्ययोः॥** KP. IV. 27.

---

1. vanyāloka, II. 3.

विभावा अनुभावा स्तत्कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तै विभावाद्यैः स्थायी भावो रसः स्मृतः ॥ KP. IV. 28.

अथ रत्यादे रनुरागादिरूपस्याभिव्यक्तावेव कथं परमानन्दरूपरसोद्बोध इति चे दुच्यते। व्यक्तः स इत्यत्र भिव्यक्तानन्दांशचिदात्मना सहेति पूरणीयम्। अय मभिसन्धिः। वेदान्तिनये सर्वस्मिन्नेव ज्ञाने आत्मभाननैयत्यात् काव्यदर्शन-श्रवणमहिम्ना उक्तयाऽभिव्यक्तया चिदात्मनः आनन्दांशे आवरणभङ्गः क्रियते। आवरणं त्वज्ञानमेव। तथा च रत्याद्यवच्छिन्नं चैतन्य मानन्दांशे भग्नावरणम्। आनन्दरूपतया प्रकाशमानं रस इति निर्गलितोऽर्थः। तथा च श्रुतिः "[1]रसं ह्येवायं लब्ध्वाऽऽनन्दी भवती" ति। अथ जीवज्ञानान्त-रेत्वावरणभङ्गाभावा न्न रसोद्बोधः। तस्यां चाभिव्यक्तौ लिङ्गोपहितलैङ्गिक भानव द्विभावादयोऽपि भासन्ते।

ननु रसस्ताव त्सामाजिकनिष्ठरत्युद्बोध एव। स कथं रामादिसम्बन्धि-त्वेनावगतेभ्यः सीतादिभ्यो विभावादिभ्यो भवति, असम्बन्धा दिति चे न्न। विभावादीनां साधारण्यमत्रापेक्षितम्। साधारण्यं च यत्किंचित्सम्बन्धि-विशेषसंबन्धित्वेन अज्ञायमानत्वे सति ज्ञायमानत्वम्। न च सीतात्वादिज्ञाने कथ मेतादृशं साधारण्य मिति वाच्यम्। तदा विभावादिव्यापारमहिम्ना सीतात्वादि परिहारेण स्त्रीत्वादिनैव ज्ञानात्। अत एवोक्तं - एता एव परिहृत-विशेषाः रसहेतव इति। एवं रत्यादेः आलम्बनकरत्वादेः साधारण्यमपि रसोद्बोधे हेतुः। अन्यथा सीताद्यालम्बनकरत्यादेः स्वनिष्ठत्वज्ञाने व्रीडाऽऽ-तङ्कादिः स्यात्। परनिष्ठत्वज्ञाने सभ्यानां रससाक्षात्कारो न स्यात्। वस्तुतस्तु सर्वस्मिन् ज्ञाने आत्मभाननैयत्यात् काव्ये तस्यानन्दांशे आवरणभङ्गतः सीता-दीनां सीतात्वादिपरिहारेण साधारण्यं, रत्यादिभावस्य च साधारण्यादि स्वीकर्तव्यम्। एतदपेक्षया कामिनीकुचमण्डलस्पर्शचन्दनानुलेपनादिनेव नाट्य-दर्शनात् सुखविशेषो जायते। स एव रस इत्येवं वक्तुमुचितम्।

1. Taitt. Up. II. vii. 6.

अथ प्राचां मते रसविशेषा: –

**शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।**
**बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥**

NS. VI. 15 and KP. IV. 29.

श्रव्यकाव्ये शान्तोऽपि रस: । अथ तेषां स्थायिभावा: ।

**रति र्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।**
**जुगुप्सा विस्मय श्चेति स्थायिभावाः प्रकीर्तिताः ॥**

NS. VI. 17 and KP. IV. 30.

शान्तस्य तु निर्वेद: स्थायी । वस्तुतस्तु शृङ्गार-वीर-हास्या-द्भुत **संज्ञा श्चत्वार एव** रसा: । करुणादीनां रसत्वं न सम्भवतीति वक्ष्यते ।

तत्र शृङ्गारस्य द्वौ भेदौ संयोगो विप्रलम्भश्च । **आद्यो यथा** –

एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतो-
रन्योन्यस्य हृदिस्थितेऽप्यनुनये संरक्षतो गौरवम् ।
दंपत्यो श्शनकै रपाङ्गचलनान्मिश्रीभवच्चक्षुषो-
र्भग्नो मानकलि: सहासरभसव्यासक्तकण्ठग्रह: ॥ 12

विप्रलम्भो यथा –

रक्ताशोकतरुं प्रफुल्लमभितो दृष्ट्वान्तिके वेश्मनो
वह्निर्वह्निरिति भ्रमान्निगदति स्त्रीप्रोषिते भर्तरि ।
किञ्चालोलितकङ्कणं करयुगेनाहत्य वक्षस्तटी-
माहूय प्रतिवेश्म निर्जलघटीरावर्जयत्याकुला ॥ 13

वीरो यथा –

मुनिरय मथ वीरस्तादृश स्तत् प्रियं मे
विरमतु तव कम्प: कातरे क्षत्रियाऽसि ।
जगति विदितकीर्ति र्दर्पकण्डूलदोष्क:
परिचरणसमर्थो राघव: क्षत्रियोऽहम् ॥ 14

हास्यो यथा –

स्थाने यस्य चरन्ति भैक्षमनघं स्नेहेन युष्मादृशः[1]
स स्या दच्युतमूर्तिसेवनवशा द्धन्यः पवित्रालयम् ।
किं त्वस्मत्प्रतिवेशिविप्रवनिता भ्रातुः प्रसक्ती गता
दूती स⌐सवेति सूनक मितः स्थानान्तरं गम्यताम् ॥ 15

अद्भुतो यथा –

चित्रं महानेष नवावतारः क्व कान्तिरेषाऽभिनवैव भङ्गिः ।
लोकोत्तरं धैर्यमहो प्रभावः काऽप्याकृति र्नूतन एष सर्गः ॥ 16

अथ करुणादीनां न कथं रसत्व मितिचे दुच्यते ।

"इष्टनाशादिभि श्चेतोवैक्लव्यं शोक उच्यते" तथा –
"रौद्रशक्त्या तु जनितं वैक्लव्यं मनसो भयम्" तथा –
"दोषेक्षणादिभि र्गर्हा जुगुप्सेति निगद्यते" – तथा
"तत्त्वज्ञानाद् यदीर्ष्यादे र्निर्वेदः स्वावमाननम्"

इत्यादिनिरुक्तशोकादिप्रकृतिकानां करुणादीनां रसत्वे विरोधात् । न च तेषां तथाभूतत्वेऽपि अभिव्यक्तानन्दांशे चिदात्मना सहाभिव्यक्तानां रसत्व मिति वाच्यम् । एवमपि स्थाय्यंशो रसत्व विरोधात् । अथालौकिकविभावाद्यभिव्यक्तानां तेषां रसत्व मुचितम् । सुरते दन्तादिघातस्यस्वाद्यत्ववदिति चेत् न । एवं क्षुधादिपिपासादिनानाविधदुःखहेतुजनितचेतोवैक्लव्यस्यापि रसत्वापत्तेः । सुरते दन्तादिघातस्य बलात् कामसंभवदुःखनाशकत्वेन भारापगमानन्तरं सुखिनः संवृत्ताः स्म इति वत् उपादेयत्वम्; किं च शोकादिहेतवस्तावत् आनन्दविरोधिनः कथं परमानन्दमभिव्यञ्जयन्तु । यत्तु शोकादयोऽपि रसादिवत् ज्ञानसुखात्मका इति त दुन्मत्तप्रलपितम् । किंच सामाजिकेषु मृतकलत्रपुत्रादिकानां विभावादीनां शोकादिस्थायिभावस्य चर्वणीयेन अजविलापादिना सह साधारण्यं अश्रुपातादि दर्शनाद्वर्णनीयतन्मयीभवनं

1. दृशाम् ।....(क)

चापेक्षितमिति कथं ब्रह्मानन्दसहोदररसोद्बोधः । कथं वा नामङ्गल्यम् । अत एव केचि दजविलापादिकं न पठन्ति । बीभत्से तु पूयाद्युपस्थित्या वान्ति-निष्ठीवनादिकं यत्र भवेत्तदेवाश्चर्यम्; कुतः परमानन्दरसोद्बोध इति । एवं भयेऽपि । तथा शान्तस्य त्यक्तसर्ववासनेषु भवतु कथञ्चि द्रसत्वम्; विषयिषु पुनः सर्वविषयोपरमोपस्थित्या कथं रसत्वम् । तदुक्तम् –

**न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा ।**
**रसः प्रशान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रधानः ॥**

एवं वीररौद्रयो र्न भेदः; विभावादिसाम्यात् । न च स्थायिभेद एव भेदकः; तस्यापि नियामकमुखप्रेक्षित्वात् । यत्त 'रक्तास्यनेत्रता रौद्रे युद्धवीरात्तु भेदिनी' इत्याहु स्तन्न । क्रोधसञ्चारिणि वीरे तस्या स्सुलभत्वेन भेदकत्वानुपपत्तेः । न च रौद्रे अविवेचकत्वस्य वीरा द्भेदकस्य सम्भवा द्भेद इति वाच्यम् । क्रोध-सञ्चारिणि वीरेऽपि अविवेचकत्वस्य संभवात् । दानवीरादीनामपि प्रभावाति-शयवर्णन एव कवीनां तात्पर्यमिति न तेषां रसत्वम् । एवं वात्सल्यादीनामपि न रसत्वम्; भावेनैव गतार्थत्वात् ।

ननु कथ मजविलापादिकं कविभि र्वर्ण्यत इति चे दुच्यते । तेषा मजमहीपतिप्रभृतीनां प्रियानुरागप्रकर्षप्रतिपत्त्यर्थम् । अत एवाजमहीपते रिन्दु-मतीं स्वप्रिया मुद्दिश्य देहत्यागः कालिदासेन वर्णितः । यथा –

तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वो-
देहत्यागा दमरगणनालेख्य मासाद्य सद्यः ।
पूर्वाकाराधिकचतुरया सङ्गतः कान्तयाऽसौ
लीलागारेष्वरमत पुन र्नन्दनाभ्यन्तरेषु ॥ 17

एवं शान्तस्यापि वर्णनं मुमुक्षूणां वैराग्यातिशयप्रतिपत्तये । एवं भयातिशयवर्णनं तत्तद्भयकर्तॄणां मार्दवप्रदर्शनाय । अत एवाभिज्ञाने कालिदासेन तथैव वर्णितम् । यथा –

न खलु न खलु बाण: सन्निपात्योऽयमस्मि-
न्मृदुनि मृगशरीरे पुष्पराशाविवाग्निः ।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसारा श्शरा स्ते ॥ 18

इत्यादि । वस्तुतस्तु कविभि: स्वशक्तिप्रदर्शनार्थमेव पद्मबन्धादिवत् तत्र तत्र प्रवर्त्यंत इति ।

अथ भावस्वरूपम् –

**रति र्देवादिविश्या व्यभिचारी तथाऽञ्जितः ।**
**भावः प्रोक्तः ...** KP. IV. 35

आदिग्रहणात् नृप मुनि गुरु पुत्रादिर्विषया । यथा –

छिन्ते ब्रह्मशिरो यदि प्रथयति प्रेतेषु सख्यं यदि
क्षीब: क्रीडति मातृभि र्यदि रतिं धत्ते श्मशाने यदि ।
सृष्ट्वा संहरति प्रजा यदि तदाप्याधाय चेतो भृशं
कं सेवे करवाणि किं त्रिजगती शून्या स एव प्रभु: ॥ 19

यथा वा –

अविरतशंभुस्तवना च्छम्भु र्भवितास्मि हर्षोऽयम् ।
हर्षा दय मतिहर्षो यद्गङ्गां मूर्ध्नि धारयिष्यामि ॥ 20

नृपविषया यथा –

कैलास: प्राक्शरीरं फणफलक मुडुग्रामणी र्नागराज:
पश्चार्धं यस्य सोऽयं तव जयति यशिराशीराशीविषेन्द्रः ।
त्वत्तेजस्युज्जिहाने विधिरपि च रविं प्रोञ्छति व्यर्थमानी
जानीम स्तावकीनासमसमरसमुद्भूतपद्धूलिदम्भात् ॥ 21

असुरादौ कवे: रत्यभावे तत्प्रभावादिवर्णनम् तज्जेतु रुत्कर्षप्रतिपादनाय । यथा -

अगृहणा दहनाय द्रुहिणकलहंसो विकलतां
शिखण्डी व्यामुग्ध: स्फुट मजनि चण्डीसुतरय: ।

अभूद्दन्तश्चिन्ता किमपर मथीशेऽपि पततां
सुरग्रामैः संग्रामयति बकवीरे प्रतिमुहुः ॥ 22

व्यभिचारी तथाऽञ्जित इति । तत्र व्यभिचारिणो यथा –

**निर्वेदग्लानिशङ्काख्या स्तथाऽसूयामदश्रमाः ।**
**आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृति र्धृतिः ॥**

**व्रीडा चपलता हर्ष आवेगो जडता तथा ।**
**गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च ॥**

**सुप्तं विबोधोऽमर्षश्चाप्यवहित्थ मथोग्रता ।**
**मति र्व्याधिस्तथोन्माद स्तथा मरणमेव च ॥**

**त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।**
**त्रयस्त्रिंश दमी भावाः समाख्यातास्तु नामतः ॥** KP. IV. 31 to 34.

तत्र निर्वेदो यथा –

स्वल्पेऽपि भालफलके कति दुष्कृतानि
हा हन्त पङ्कजभुवा लिखितानि तानि ।
येषां फलानि विविधान्यनुभूय भूयो
भूयोऽपि जन्मनि मया न समापितानि ॥ 23

यथा वा –

विद्यया विनयावाप्तिः साचेदविनयावहा ।
किं कुर्मः कस्य वा ऽमो गरदायां स्वमातरि ॥ 24

एव मन्येऽपि द्रष्टव्याः ।

... **तदाभासा अनौचित्यप्रवर्तिताः ।** KP. IV. 36.

तदाभासाः, रसाभासा भावाभासाश्च यथा –

कश्चित् स्मितेन मधुरेण कृतार्थवन्त्यो
दृग्भङ्गिभिः कमपि, कञ्चन भाषितेन ।

अभ्युल्लसद्विविधविभ्रमभङ्गि देव
यात्रामिषा युवतयः परितो भ्रमन्ति ॥ 25

अत्र रते रनेककामुकविषयत्वा द्रसाभासत्वम्। वस्तुतस्तु परस्परजीवितसर्वस्वयो रनुरागस्यैव रसत्वात् शास्त्रातिक्रमाद्यनौचित्यं न रसत्वविरोधीति ध्येयम्। भावाभासो यथा –

या मया पुरतः पश्चा दन्यतोऽपि सदेक्ष्यते।
बध्नाति न पुन र्भावं मयि सा धिक् करोमि किम् ? ॥ 26

अत्रानुभयनिष्ठा चिन्ता अनौचित्यप्रवर्तिताऽऽभासरूपा।

**भावस्य शान्ति रुदय स्सन्धि श्शबलता तथा ॥** KP. IV. 36.

तत्र भावस्य शान्ति र्यथा –

तस्यां रघोः सूनु रुपस्थितायां
वृणीत मां नेति समाकुलोऽभूत्।
[1]आश्वासित स्तत्क्षणमंसमूले
वामेतरेण स्फुरता भुजेन ॥ 27

अत्राऽऽवेगस्य।

विलोचनं दक्षिण मञ्जनेन
संभाव्य तद्वञ्चितवामनेत्रा।
तथैव वातायनसन्निकर्षं
ययौ शलाका मपरा वहन्ती ॥ 28

अत्रौत्सुक्यस्य।

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
निक्षेपणाय पद मुद्धृत मुद्वहन्ती।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥ 29

अत्रावेगहर्षयोः।

1. वामेतरः संशयमस्य बाहुः केयूरबन्धोच्छ्वसितै र्नुनोद ॥ is also the reading of these last two lines. Śrīvatsa takes the reading अंसकूटे for अंसमूले in his KPa.

[1]क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा
दोषाणां प्रशमाय नः श्रुतमहो कोऽपि कान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्य मुपैहि कः खलु युवा धन्योऽधरं धास्यति ॥ 30

अत्र वितर्कौत्सुक्य मति स्मरण शङ्का दैन्य धृति चिन्तानां पूर्वपूर्वोपमर्देन परपरोदयः शबलता ।

**मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन ।** KP. IV. 37.

(अङ्गित्वं) राजानुगतवैवाहप्रवृत्तनृपभृत्यवत् ।

इद मनुपपन्नम् । तथा हि – रत्यादिसञ्चारणात् व्यभिचारिणां भवतु कथंचन मुख्यत्वं सर्वथोदासीनानां च भावप्रशमादीनां मुख्यत्वं न संभवत्येव ।

**अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः ॥** KP. IV. 37.

**शब्दार्थोभय[2]शक्त्युत्थं स्त्रिधा स कथितो ध्वनिः ।** KP. IV. 38.

अनुस्वानोऽनुरणनं तदाभ स्तत्सदृशः संलक्ष्यः क्रमः पौर्वापर्य मर्थात् व्यञ्जकेन सह यस्य एवंविधस्य व्यङ्ग्यस्य स्थिति र्यत्र स इत्यन्वयः । यथा ध्वनिप्रतिध्वन्योः क्रमो लक्ष्यते तद्व द्वस्त्वलंकृतितद्व्यञ्जकयो रित्यर्थः । अत्रेद मवधेयम् । वस्त्वलंकृतिध्वन्योः क्रमः संलक्ष्यते, रसभावादिषु क्रमो न लक्ष्यते इत्यत्रालङ्कारशास्त्रायोगिन एव साक्षिण इति । स च शब्दशक्त्युद्भवोऽर्थशक्त्युद्भवः, उभयशक्त्युद्भवश्चेति त्रिविधः । तत्र शब्दा यत्र परिवृत्ति

---

1. This verse, in the opinion of Jayanta, Maheśvara and Nāgoji Bhaṭṭa etc., belongs to the *Vikramorvaśīya*. Though the present editions do not contain this verse, the edition brought out in 1879 A.D. contains this verse in page 122.

Śrivatsalañchana, Kamalākara, Vaidyanātha and Bhīmasena etc opine that this is uttered by the king Yayāti on seeing Devayānī the daughter of Śukra. This may not be correct.

— Comt : KP.

2. °त्थान् शुद्धस्त्रिधा । MS.

नसहन्ते स शब्दशक्त्युद्भव: । तदन्योऽर्थशक्त्युद्भव: । यत्र केचन शब्दा: परिवृत्तिसहिष्णव: , केचि दन्यथा; उभयोरपि काव्यसर्वस्वत्वं च, तत्रोभयशक्तिमूल: । अत्र –

**अलङ्कारोऽथ वस्त्वेव शब्दा यत्रावभासते ॥** KP. IV. 38.

**प्रधानत्वेन स ज्ञेय: शब्दशक्त्युद्भवो द्विधा ।** KP. IV. 39.

न वस्त्वेवेत्यनलङ्कारं वस्तुमात्रम् । आद्यो यथा – भद्रात्मन इत्यादि । अत्र मिथोऽसंबद्धार्थद्वयबोधकत्वेन वाक्यभेदो माभूदिति प्रकृताप्रकृतयो रुपमालङ्कार: कल्पनीय इति, उपमालङ्कारो व्यङ्ग्य इति व्यवहर्तव्यम् ।

वस्तुमात्रं यथा –

शनि रशनिश्च तमुच्चै र्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम्
[1]यत्र प्रसीदसि पुन: स भात्युदारोऽनुदारश्च ॥ 31

अत्र विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुत इति वस्तु ध्वन्यते ।

**अर्थशक्त्युद्भवोऽप्यर्थो व्यञ्जक: संभवी स्वत: ॥** KP. V. 39.
**प्रौढोक्तिमात्रसिद्धो वा कवेस्तेनोम्भितस्य वा ।**
[2]**वस्तु वालङ्कृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत् ॥** KP. IV. 40.
**वस्त्वलङ्कारमथ वा तेनाऽसौ द्वादशात्मक: ।** इति । KP. IV. 41.

अत्रार्थशक्त्युद्भवस्य द्वादश भेदा इति यदुक्तं [3]तदनुपपन्नम् । यत: कविनिबद्धस्यापि कवित्वात् प्रौढोक्तिमात्रसिद्धा श्चत्वार एव भेदा इति । वस्तुतस्तु 'अनुस्वानाभसंलक्ष्य' इत्यादौ संक्षेपेणायमेवार्थ: । यथा संलक्ष्यक्रमस्य द्वौ भेदौ । अलङ्कारतदन्यवस्तुरूपौ । शब्दशक्तिमूलोऽर्थशक्तिमूलोऽर्थश्च द्विविध: ।

---

1. यस्य is the reading in KPa. and Km

2. In this verse the readings of KPa. for the 2nd and 4th lines are — चतुर्भेदो व्यनक्ति यत् and तेनाऽसा वष्टधा मत: ; respectively.

3. A complete classification of this can be found in KPa. Page 26.

स्वतस्संभवी प्रौढोक्तिमात्रनिष्पन्न इति । अन्यत्तु सर्वं स्वबुद्धिसौष्ठवप्रकटनम् । तत्र शब्दशक्तिमूलालङ्कारवस्तुध्वनिः 'भद्रात्मन' इत्यादिना 'शनिरशनिश्च' इत्यादिना चोदाहृतौ । स्वतःसंभव्यर्थशक्तिमूलवस्तुध्वनिर्यथा --

†अलससिरोमणि धुत्ताणं अग्गिमो पुत्ति धणसमिद्धिमओ ।
इअ भणिएण णअङ्गि पप्फुल्लविलोअणा जाआ ॥ 32

अत्र ममैवाय मुपभोग्य इति वस्तु स्वतस्संभविना अर्थेन व्यज्यते । एवमलङ्कारध्वनि रप्युदाहार्यः । प्रौढोक्तिमात्रनिष्पन्नार्थशक्तिमूलध्वनि र्यथा –

*महिलासहस्सभरिए तुह हिअए सुहअ सा अमाअन्ती ।
अणुदिणमणण्णकम्मा अङ्गं तणुअं वि तणुएइ ॥ 33

अत्र त्वलङ्कारेण प्रौढोक्तिनिष्पन्नेन तनो स्तनूकरणेऽपि तव हृदये सा न वर्तते इति विशेषोक्ति र्ध्वन्यते । एवं वस्तुध्वनिर प्युदाहार्यः ।

उभयशक्तिमूलध्वनिर्यथा – -

अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा ।
तारकातरला श्यामा सानन्दं न करोति कम् ॥ 34

अत्र परिवृत्त्यसहिष्णुशब्देनार्थेन च समकक्षतया रात्रि नायिकयो रुपमानोपमेयभावो व्यज्यत इति उभयशक्तिमूलत्वम् । भद्रात्मन इत्यादौ यद्यपि परिवृत्त्यसहिष्णवोऽपि शब्दा विद्यन्ते तथापि नोभयशक्तिमूलत्वम् । तेषां शब्दानां काव्यसर्वस्वत्वाभावात् । उभयशक्तिमूलध्वनिं विना वाक्यवत् पदे ध्वनयो भवन्तीति प्राञ्चः । उभयशक्तिमूलध्वनिरपि पदेऽपि भवतीति नवीना यथा –

त मनुगतवती शठं मदर्थे
त्वमपि च मत्सदृशी कृतासि धात्रा ।

---

†अलसशिरोमणिः धूर्तानां मग्रिमः पुत्रि धनसमृद्धिमयः ।
इति भणितेन नताङ्गी प्रफुल्लविलोचना जाता ॥

*महिलासहस्रभरिते तव हृदये सुभग सा अमान्ती ।
अनुदिनमनन्यकर्मा अङ्गं तन्वपि (तनुकमपि) तनयति ॥

वहति वपु रिदं गतागतैस्ते
[1]नवरतखेदमवाप्य यत्कृशत्वम् ॥ 35

इत्यत्र गुरुपरीति पाठे वक्त्रादिवैशिष्ट्येन दूत्या स्वकामुकसंभोगप्रकाशनेनार्थ-शक्तिमूलत्वम् । सति च तस्मिन् पाठे वक्त्रादिवैशिष्ट्य मनपेक्ष्यैव शब्द-शक्तिरेव तत्र प्रभवतीति पदेऽप्युभयशक्तिमूलता भवतीति तत्र वाक्ये पूर्व मुदाहृता । पदेऽपि यत्किञ्चि दुदाह्रियते ।

बहव स्ते गुणा राज न्नेकस्तु सुमहान् गुणः ।
मित्राणि तव मित्राणि नान्यथा स्युः कदाचन ॥ 36

अत्र द्वितीयमित्रशब्देनाऽऽश्वस्तत्वं लक्ष्यते, तदतिशयश्च व्यज्यते । एव मन्य-दपि स्वय मूह्यम् ।

... **प्रबन्धेऽप्यर्थशक्तिभूः** ॥ KP. IV. 42.

तदुदाहरणानि प्रबन्धेषु स्वयं द्रष्टव्यानि ।

**पदैकदेशरचनावर्णेष्वपि रसादयः** । KP. IV. 43.

अपिशब्दात् प्रबन्धेऽपीति रचनावर्णादीनां व्यञ्जकत्वं नास्तीति प्रति-पादितम्। तद्व्यञ्जकत्वम प्यनुमापकत्वादिरूप मित्यपि स्मर्तव्यम्। पदं द्विविधम्। सुबन्तं तिङन्तं च। एकदेशो धातुनामरूपः प्रकृतिभागः तिङ् सुप्प्रत्ययभागश्च।

तत्र धातो र्व्यञ्जकता यथा –

* रइकेलिहिअणिअंसणकरकिसलअरुद्धणअणजुअलस्स ।
रुद्दस्स तइअणअणं पव्वइपरिचुंबिअं जअइ ॥ 37

अत्र जयते रुत्कर्षप्रत्ययो भवति। स च लोकोत्तररूपपिधानवत्तया। लोकोत्त-रता च चमत्कारानुगुणतया । आनुगुण्यं रागातिशयहर्षलज्जासंपत्तिद्वारक-

1. Here this line can be read as गुरुपरिखेदमवाप्य etc. etc.

* रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य ।
रुद्रस्य तृतीयनयनं पार्वतीपरिचुंबितं जयति ॥

रसातिशयपोषणात्। तच्च जयतिना साध्यते न तु शोभत इत्यादिना इति प्रकृते धातो व्यञ्जकता।

नाम्नो यथा –

प्रेयान् सोऽयमपाकृतः सशपथं पादानतः कान्तया
द्वित्राण्येव पदानि वासभवना यावन्न यात्युन्मनाः।
तावत्प्रत्युत पाणिसंपुट[1]लसन्नीवीनिबन्धं धृतो
धावित्वैव कृतप्रणामक महो प्रेम्णो विचित्रा गतिः॥ 38

अत्र पदानीति, न तु द्वाराणीति। तथा च द्वारादिव्यवच्छेदो व्यङ्ग्यः। स च संभोगसंचार्यौत्सुक्योद्बोधनद्वारा रसपोषणकृत्।

तिङ्सुपोर्यथा – 'रमणीयः क्षत्रियकुमार आसीत्' इत्यतीतकालोपदेशात् स्थितेर्वर्तमानत्व भविष्यत्वव्यवच्छेदो गम्यते। एषा हि, दाशरथिं प्रति कुपितस्य भार्गवस्योक्तिः। यथा –

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम्।
बन्दीवैष यशांसि गायति मरुद्यस्यैकबाणाहत-
श्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः॥ 39

अत्रासावित्यनेन निरन्तरभावनावशेन प्रत्यक्षायमाणत्वम्। भुवनेष्विति बहुवचनेन न यत्र क्वचिदिति। गुणैरित्यनेन दोषव्यवच्छेदो व्यज्यते। एव मन्यदपि स्वय मूहनीयम्। एव मेषां ध्वनीनां संशयास्पदत्वेनानुग्राह्यानुग्राहकतया एकव्यञ्जकानुप्रवेशेन चेति त्रिरूपेण सङ्करेण परस्परनिरपेक्षणया चैकप्रकारया संसृष्ट्या एकत्र काव्ये संसर्गरूपयान्योन्ययोजनम्। यथा –

*खणपाहुणिआ देअर जाआए सुहअ किंपि दे भणिआ।
रुअइ पडोहरवलहीधरम्मि अणुणिज्जउ वराई॥ 40

अत्रानुनयः कि मुपभोगलक्षणेऽर्थान्तरे संक्रमितः, कि मनुरणनन्यायेनोपभोग एव व्यङ्ग्ये व्यञ्जक - इति सन्देहः।

---

1. °गलन्° KP. P. 170.

*क्षणप्राघुणिका देवर जायया सुभग किमपि ते भणिता।
रोदिति गृहपश्चाद्भागवलभीगृहेऽनुनीयतां वराकी॥

-98172

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घनाः
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति ह हा हा देवि धीरा भव ॥ 41

अत्र लिप्तेति पयोदसुहृदामिति चात्यन्ततिरस्कृतवाच्ययोः संसृष्टिः । आभ्यां सह रामोऽस्मीत्यर्थान्तरसंक्रमितवाच्यस्यानुग्राह्यानुग्राहकभावेन रामपदलक्षणैकव्यञ्जकानुप्रवेशेन चार्थान्तरसंक्रमितवाच्यरसध्वन्योश्च सङ्करः । अत्र या त्वविक्षितवाच्यप्रभृतीनां ध्वनीनां प्राचीनैः संख्या कृता सा अनुपयुक्तत्वात् दुष्टत्वा न्न लिखिता । दुष्टत्वं पुनः सारबोधिन्या मनुसन्धेयम् ॥

॥ इति काव्यामृते तृतीय उल्लासः ॥

# चतुर्थोल्लासः

अथ परोक्तगुणीभूतव्यङ्ग्यभेदा नाह –

**अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्ग मस्फुटम् ।**
**सन्दिग्धतुल्यप्राधान्ये काकाक्षिप्त मसुन्दरम् ॥**
**व्यङ्ग्य मेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदाः स्मृताः ।** KP. V. 45–46.

**अष्टौ भिदा** इति । वस्तुतस्तु व्यङ्ग्य मप्रधानं संदिग्धतुल्यप्राधान्य मिति त्रय एव प्रकाराः । तत्रागूढं यथा –

श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् ।
उपदिशति कामिनीनां यौवनमद एव ललितानि ॥ 42

अत्रानायासेन शिक्षादान मभिधयैव स्फुटं प्रतीयते । अपरस्य रसादे र्वाच्यस्य वा रसादि अनुरणनरूपं वा अङ्ग मुत्कर्षरूपम् । यथा –

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥ 43

अत्र शृङ्गारः करुणस्य । यथा वा –

अध्यास्ते त्वत्किरीटं स्मरमथन कथं सन्ततं जह्नुकन्या
पुण्यायेमां बिभर्मि ध्रुवमचलसुते वागसाधो र्न मानम् ।
सर्पाग्निभ्यां परीक्ष्ये, वपुषि तदुभयं बिभ्रत स्ते परीक्षा
कस्मा त्ताभ्यां शठेति क्षितिधरतनयाशूलिनोः पान्तु वाचः ॥ 44

अत्र भावस्य रसः । एवं रसाभासादीनामपि रसाङ्गत्वं बोध्यम् ।

तदिद मरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी ।
निवसन् बाहुसहाय श्चकार रक्षःक्षयं रामः ॥ 45

अत्र वाच्यस्यारण्यस्य वीररस उत्कर्षकः । तथा हि – इदमरण्य मेतादृशं यत्र स्थित्वा व्यसन्यपि बाहुमात्रसहायोऽपि रामो रक्षांसि जिगाय । अनुरणनरूपस्य च

रसादिकं च वाच्यं च प्रत्युत्कर्षक स्पष्ट इति नोदाहृतम्। यद्यपि 'अयं स रश-नोत्कर्षी' इत्यादौ करुणरसध्वनित्व मस्त्येव, तथापि प्राचां गड्डरिकाप्रवाहादेव गुणीभूतव्यवहार: इति ध्येयम्। वाच्यसिद्ध्यङ्गं यथा –

गच्छाम्यच्युत दर्शनेन भवत: किं तृप्ति रुत्पद्यते
किं त्वेवं विजनस्थयोर्हृतजन: संभावयत्यन्यथा।
इत्यामन्त्रणभङ्गिसूचितवृथावस्थानखेदालसा-
माश्लिष्यन् पुलकोत्कराञ्चिततनु र्गोपीं हरि: पातु व:॥ 46

अत्राच्युतादिपदव्यङ्ग्यं आमन्त्रणेत्यादिवाच्यस्य सिद्धिकृत्।

अस्फुटं यथा –

अदृष्टे दर्शनोत्कण्ठा दृष्टे विश्लेषभीरुता।
नादृष्टेन न दृष्टेन भवता लभ्यते सुखम्॥ 47

अत्रादृष्टो यथा न भवसि वियोगभयं च नोत्पद्यते तथा कुर्या इति व्यङ्ग्यं झटिति सर्वैरपिं न प्रतीयते। वस्तुतस्तु अयं भेद: स्वबुद्धिमात्रकल्पित एव। इदं व्यङ्ग्यं व्यङ्ग्यान्तरवत् सहृदयै विलंबेन प्रतीयत इत्यस्य शपथैरेव प्रत्याययितुं शक्यत्वात्॥

सन्दिग्धप्राधान्यं यथा –

हरस्तु किञ्चि त्परिवृत्तधैर्य-
श्चन्द्रोदयारंभ इवांबुराशि:।
उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि॥ 48

अत्र परिचुंबितुमैच्छ दिति किं प्रतीयमानम्, किं वा विलोचनव्यापारणं वाच्यं प्रधान मिति सन्देह:।

तुल्यप्राधान्यं यथा –

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यस्तथा मित्र मन्यथा दुर्मनायते॥ 50

अत्र जामदग्न्यः सर्वेषां क्षत्रियाणामिव रक्षसां क्षयं करिष्यतीति व्यङ्ग्यस्य दण्डरूपस्य वाच्यस्य च सामरूपस्य समं प्राधान्यम्। तथा हि। भृत्युपदेशमित्रत्वाभिधानं साम वाच्यम्। उक्तरूपश्च दण्डो व्यङ्ग्यः। उभयोरप्यनर्थनिवारकत्वेन तुल्यता।

काक्वाक्षिप्तं यथा –

मथ्नामि कौरवशतं समरे न कोपा-
दुश्शासनस्य रुधिरं न पिबाम्युरस्तः।
सञ्चूर्णयामि गदया न सुयोधनोरू
संधिं करोतु भवतां नृपतिः पणेन ॥ 51

सन्धिश्रवणकुपितस्य भीमसेनस्योक्तिरियम्। अत्र मथ्नाम्येवेति काक्वा व्यङ्ग्यं गुणीभूतम्। इद मनुपपन्नम्। तथा हि - मथ्नाम्येवेति व्यङ्ग्यस्य भीमसेनगतक्रोधप्रकर्षकत्वेन रौद्ररसोपोद्बलनद्वारा वाच्या त्सातिशयचमत्कारित्वे ध्वनित्वे संभवति कुतो गुणीभूतव्यङ्ग्यत्वम्।

असुन्दरं तत् यत्र व्यङ्ग्यं चमत्कारित्वे वाच्यमुखनिरीक्षकम्। यथा –

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहु र्नितरां मलिना मुखच्छाया ॥ 52

अत्र दत्तसङ्केता नागतेति व्यङ्ग्यस्य वाच्यापेक्षया चमत्कारित्वात् ॥

॥ इति काव्यामृते चतुर्थ उल्लासः ॥

# पञ्चमोल्लासः

अथ दोषस्वरूपमाह –

**मुख्यार्थहति र्दोषो रसश्च मुख्य स्तदाश्रया द्वाच्यः।**
**उभयोपयोगिनः स्युः शब्दाद्या स्तेन तेष्वपि सः॥** KP. VII. 49.

हति रपकर्षः। सा च रत्याद्यवाच्छिन्नस्य चैतन्यस्यानन्दांशे ह्यावरणस्य लेशेन स्थितिः। सा च दोषज्ञापना द्भवति। इद मनुपपन्नम्। "[1]उत्तिविसेसो कव्वो भासा जा होइ सा होउ" इति काव्यरसज्ञानां वाचोयुक्तिश्रवणात् च्युतसंस्कृत्यादीनां मुख्यार्थहतित्वाभावात्। अथ दोषविशेषलक्षणा न्याह –

यद्यपि सर्वे दोषा वाच्याऽवचनाऽवाच्यवचनयो र्द्वयो र्दोषयोरेवान्तर्भवितु-मर्हन्ति। तथापि तयोरेव विषयविशेषप्रदर्शनार्थ मयं पदादिदोषविभागः। यथा –

**दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्यप्रत्युक्त मसमर्थम्।**
**निहतार्थमनुचितार्थं निरर्थक मवाचकं त्रिधाऽश्लीलम्॥** KP. VII. 50.

**सन्दिग्ध मप्रतीतं ग्राम्यं नेयार्थमथ भवे त्क्लिष्टम्।**
**अविमृष्टविधेयांशं विरुद्धमतिकृ त्समासगतमेव॥** KP. VII. 51.

श्रुतिकटुत्वं मुख्यार्थापकर्षकत्वे सत्योजोव्यञ्जकवर्णत्वम्। यथा –

अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः।
आलिङ्गित स्स तन्वङ्गया कार्तार्थ्यं लभते कदा॥ 53

अत्र कार्तार्थ्यमिति [2]न चारु। वर्णानां मुख्यार्थापकर्षकत्वाभावात्। अत एव,

अलसवलितैः प्रेमार्द्रार्द्रै र्मुहुर्मुकुलीकृतैः
क्षणमभिमुखै र्लज्जालोलै र्निमेषपराङ्मुखैः।
हृदयनिहितं भावाकूतं वमद्भि रिवेक्षणैः
कथय सुकृती कोऽयं मुग्धे त्वया हि विलोक्यते॥ 54

---

1. उक्तिविशेषः काव्यं भाषा या भवति सा भवतु॥
2. तन्नचारु। वर्णानां......कत्वाभावात्।......(क)

इत्यत्र महाकविभिः शृङ्गारे परुषवर्णोपादानं कृतमिति । तथा –

प्रेमार्द्राः प्रणयस्पृशः परिचया दुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुरा श्चेष्टा भवेयु र्मयि ।
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसापरिकल्पितास्वपि भव त्यानन्दसान्द्रो लयः ॥ 55

इत्यादिषु । तथा –

सा च दूरे सुधासान्द्रतरङ्गितविलोचना ।
बर्हिनिर्ह्रादनार्होऽयं कालश्च समुपागतः ॥ 56

इत्यादि शृङ्गारे परुषवर्णोपादानकरणात् ।

च्युतसंस्कृति, व्याकरणलक्षणहीन मसाध्विति यावत् । यथा –

प्रजा इवाङ्गा दरविन्दनाभेः
शंभो र्जटाजूटतटादिवापः ।
मुखादिवाथ श्रुतयो विधातुः
पुरा निरीयु[1]र्मुरजिद्ध्वजिन्यः ॥ 57

अत्रारविन्दनाभे रिति । ग्रामगाम इत्यादि वा । तदपि न चारु । तत्रान्वयबोधस्यानुभवसिद्धत्वात् । साधुशब्दस्मरणादिना द्वित्रिक्षणविलंबस्याकिञ्चित्करत्वे मुख्यार्थहते रप्रभवात् । तथाविधरचनायां, कवे रेवापकर्षो न रसोद्बोधस्य 'उत्तिविसेसो कव्वो भासा जा होइ सा होउ' इत्यादिश्रवणात् । न च तथापि कवे रपकर्षकारित्वे 'काव्यं यशसे' इति न स्या दिति वाच्यम् ; तथाप्यस्य दोषस्याकाव्येऽपि विशिष्योपादानस्यायुक्तत्वात् । एवं निहतार्थमपि न दूषणम् । द्वित्रिक्षणविलंबस्याकिञ्चित्करत्वात् । एव मप्रयुक्त तथाऽऽम्नातमपि कविभिः नादृत मित्येवंरूपम् । यथा –

यथायं दारुणाचारः सर्वदैव विभाव्यते ।
तथा मन्ये दैवतोऽयं पिशाचो राक्षसोऽथवा ॥ 58

अत्र दैवतशब्दः पुंस्याम्नातोऽपि न केनचित्प्रयुज्यत इत्यप्रयुक्तम् तदपि न दूषणम् । तथा हि–स त्यनुशासने कवे रनादरणं कवे रनादरायैव भविष्यति ।

1 मधुजित् also is another reading.

असमर्थं उपसन्दानं विना अनुशिष्टार्थबोधकम्। यथा –

तीर्थान्तरेषु स्नानेन समुपार्जितसत्क्रियः।
सुरस्रोतस्विनी मेष हन्ति संप्रति सादरम्॥ 59

अत्र हन्तीति गमनार्थम्। इदमपि दूषणं न सम्यगिव प्रतिभाति। तथा हि – उद्धतिपद्धतीत्यादौ उपसन्दानेन अनुशिष्टार्थबोधने सामर्थ्य मङ्गीकृतमेव। अनुपसन्दाने सामर्थ्यं नास्तीति केन शपथः कृतः इति। किंच इदं तावत् काव्याकाव्यसाधारणं दूषणं काव्ये विशिष्य किमि त्युच्यत इति न जानीमः। अत एव च्युतसंस्कृतिनिरर्थकानुचितार्थाश्लीलाविमृष्टविधेयांशसन्दिग्धाप्रतीत-क्लिष्टविरुद्धमतिकृतां काव्याकाव्यसाधारणदूषणानां काव्ये विशिष्य दोषतयोपादानं न चारुता मावहति। एतेषां क्रमेणोदाहरणानि। तत्र च्युतसंस्कृतिं प्रागेवोदाहृतम्। अन्यान्युदाह्रियन्ते।

उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि।
अभिवाञ्छितं प्रसिध्यतु भगवति युष्मत्प्रसादेन॥ 60

अत्र 'हि' इतिपदम्।

तपस्विभि र्या सुचिरेण लभ्यते
प्रयत्नतः सत्रिभि रिष्यते च या।
प्रयान्ति ता माशु गतिं यशस्विनो
रणाश्वमेधे पशुता मुपागताः॥ 61

अत्र पशुपदं कातरता मभिव्यनक्तीत्यनुचितार्थम्।

अश्लीलं त्रेधा भवति व्रीडाजुगुप्सामाङ्गल्यदायित्वात्। आद्यं यथा –

साधनं सुमह द्यस्य य न्नान्यस्य विलोक्यते।
तस्य धीशालिनः कोऽन्यः सहेतारालितां भ्रुवम्॥ 62

एवमादि स्वय मुदाहार्यम्।

न्यक्कारोह्ययमेव मे यदरय स्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीव त्यहो रावणः।
धिग्धिक् शक्रजितं प्रबोधितवता किं कुंभकर्णेन वा
स्वर्गग्रामटिकाविलुंठनवृथोच्छूनैः किमेभि र्भुजैः॥ 63

अत्रायमेव न्यक्कार इत्येव वाच्यं तदैव विधेयस्य प्राधान्येन निर्देशो भवति। अयन्तु कथादावपि दोषः।

आलिङ्गित स्तत्र भवान् सम्पराये जयश्रिया।
आशीःपरंपरां वन्द्यां कर्णे कृत्वा कृपां कुरु॥

अत्र वन्द्या मिति बद्धायां किं प्रयुक्त मुत नमस्या मिति सन्दिग्धम्।

प्रति प्रतिशास्त्रे इतं प्रतीतं न प्रतीत मप्रतीतं यत्किञ्चिच्छास्त्रपरिभाषित मित्यर्थः। यथा –

सम्यग्ज्ञानमहाज्योतिर्दलिताशयताजुषः।
विधीयमान मप्येत न भवेत् कर्मबन्धनम्॥ 64

अत्राशयशब्दो वासनापरपर्यायो योगशास्त्र एव।

क्लिष्टं यत्रार्थप्रतिपत्ति र्व्यवहिता। यथा –

धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरङ्गशाबाक्ष्याः।
रज्य त्यपूर्वबन्धव्युत्पत्ते र्मानसं शोभाम्॥ 65

विरुद्धेति प्रकृतार्थधीप्रतिबन्धकीभूताप्रकृतार्थधीजनकं विरुद्धमतिकृत्। यथा–

चिरकालपरिप्राप्तलोचनानन्ददायिनः।
कान्ता कान्तस्य सहसा विदधाति गलग्रहम्॥ 66

अत्र कण्ठग्रह मिति वक्तव्ये [1]गलग्रह मिति।

एवं ग्राम्य मपि अनुभवकलहपर्यवसानेन न दोषता मावहति। यथा –

राकाविभावरीकान्तसङ्क्रान्तद्युति ते मुखम्।
तपनीयशिलाशोभा कटिश्च हरते मनः॥ 67

अत्र कटिपदम्। अत्र कट्यादिपदं ग्राम्यं श्रोणीनितंबादिपद मग्राम्यमिति। अत्र दुर्दुरूटं प्रति कस्यचि द्विनिगमकस्य वक्तु मशक्यत्वात्।

तथा रूढिप्रयोजनान्यतरशून्यलाक्षणिकं पदं नेयार्थमपि न दूषणम्। सर्वत्र लक्षणायां रूढिप्रयोजनान्यतरसत्वनियमासंभवात्। यथा –

---

1. गलग्रहशब्दो रोगविशेषे निरूढः।

वस्त्रवैडूर्यचरणैः प्रातर्युक्तं नभस्तलम् ।
काश्मीररागारुणितं विष्णोर्वक्ष इवाबभौ ॥ 68

अत्र वस्त्रवैडूर्यचरणै रम्बररत्नपादै रित्यर्थो नेयः ।

एव मवाचकं तत् यत् सङ्केतविरहादबोधकम् । असमर्थेनाऽसङ्केतः लाक्षणिकेनाबोधकत्व मिति । तयो र्न प्रसङ्गः । यथा –

अवन्ध्यकोपस्य विहन्तु रापदां
भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना
न जातहार्देन [1]न विद्विषादरः ॥ 69

अत्र जन्तुपद मद तृ त्रे प्रयुक्तं, तत्र च नाभिधायक मिति । तदपि न चारु । तात्पर्यानुपपत्त्या लक्षणया सामान्यशब्दस्यादातृत्वविशेषपरत्वसंभवाच्च । न च सुब्विभक्तौ न लक्षणेति तत्रेदं दूषण मिति वाच्यम् । तर्हीदं काव्याकाव्य-साधारणं काव्ये विशिष्योपादानं नार्हति ।

अथ वाक्यमात्रगामिदोषा नाह –

**प्रतिकूलवर्ण मुपहतलुप्तविसर्गं विसन्धि हतवृत्तम् ।**
**न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तम् ॥**
**अर्धान्तरैकवाचक मभवन्मतयोग मनभिहितवाच्यम् ।**
**अपदस्थपदसमासं सङ्कीर्णं गर्भितं प्रसिद्धिहतम् ॥**
**भग्नप्रक्रम मक्रम ममतपरार्थं च वाक्यमेव तथा ।** K.P. VII. 53-55.

रसानुगुणत्वं वर्णानां प्राचीनै रुच्यते, तद्विपरीतत्वं प्रतिकूलत्वम् । यथा शृङ्गारे–

अकुण्ठोत्कण्ठया पूर्ण माकण्ठं कलकण्ठि माम् ।
कंबुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्ति मुद्धर ॥ 70

अत्र परुषा वर्णाः प्रतिकूलाः । एवं रौद्रादावपि मसृणा वर्णाः प्रतिकूला इति मन्तव्यम् । इदं न चारु । तत्तद्रसेषु तत्तद्वर्णाना मानुकूल्यस्य प्रातिकूल्यस्य च

1. च (Fn. Pt. ed.)

सर्वै रनभ्युपगतत्वात्। अत एव शृङ्गारादिषु महाकवीनां परुषा वर्णा दृश्यन्ते। यथा –

अविदितसुखदु:खं निर्गुणं वस्तु किञ्चित्
जडमातिरिह कश्चि न्मोक्ष इत्याचचक्षे।
मम तु मतमनङ्गस्मेरतारुण्यघूर्ण-
न्मदकलमदिराक्षीनीविमोक्षो हि मोक्षः॥ 71

उपहतलुप्तविसर्गम्। ओत्वं प्राप्तो लुप्तो वा विसर्गो यत्र तत्। यथा –

धीरो विनीतो निपुणो निर्विकारो नृपोऽत्र सः।
यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविताः॥ 72

सन्धे वैरूप्यं विश्लेषोऽश्लीलत्वं च। क्रमेण यथा –

राजन् विभान्ति भवत श्चरितानि तानि
इन्दो र्द्युतिं दधति यानि रसातलेऽन्तः।
धीदोर्बले अतितते उचितार्थवृत्ती
आतन्वती विजयसंपद मेत्य भातः॥ 73

वेगा दुड्डीय गगने चलण्डामरचेष्टितः।
अय मुत्पते पत्री ततोऽत्रैव रुचिङ्कुरु॥ 74

उर्व्यसावत्र तर्वाली मर्वन्ते चार्ववस्थितिः।
नात्रर्जु युज्यते गन्तुं शिरो नमय तन्मनाक्॥ 75

हतवृत्तं लक्षणानुसारेणाप्यश्रव्यम्। यथा –

पितृव्याहरि [1]मिश्रोपदिष्टो भाव: प्रकाशति।

इति। एते त्रयो न दोषाः। तथाहि – एतेषां बन्धशैथिल्यापादकत्वमेव दूषकताबीजम्। तथा च बन्धदार्ढ्यरूपश्लेषनाम्नो गुणस्याभावरूपत्वमेव न दोषत्वम्। न च वैपरीत्यमेव कुतो न स्या दिति वच्यम्। एतेषा मभावेऽपि बन्धदार्ढ्यरूपं श्लेषस्य सत्वात्।

न्यूनपदं यथा –

---

1. Not clear.

त्वयि निबद्धरतेः प्रियवादिनः
प्रणयभङ्गपराङ्गमुखचेतसः ।
कमपराधलवं मम पश्यसि
त्यजसि भामिनि दासजनं यतः ॥ 76

अत्रापराधस्य लवमपीति वाच्यम् ।

अधिकपदं यथा –

स्फटिकाकृतिनिर्मलः प्रकामं
प्रतिसंक्रान्तनिशातशास्त्रतत्वः ।
अविरुद्धसमर्थितोक्तियुक्तः
प्रतिमल्लास्तमयोदयः स कोऽपि ॥ 77

अत्राकृतीतिपदं ।

कथितपदं यथा –

अधिकरतलतल्पं कल्पितस्वापलीला
परिमिलननिर्मीलत्पाण्डिमा गण्डपाली
सुतनु कथय कस्य व्यञ्जयत्यञ्जसैव
स्मरनरपतिलीलायौवराज्याभिषेकम् ॥ 78

अत्र लीलेति । एते दोषा अपि न सम्यञ्चः । काव्याकाव्यसाधारणदोषाणामेतेषां काव्ये विशिष्य दोषतया कीर्तनस्यायुक्तत्वात् ।

पतत्प्रकर्षं यथा –

कः कः कुत्र न घुर्घुरायितघुरीघोरो घुरे त्सूकरः
कः कः कं कमलाकरं विकमलं कर्तुं करी नोद्यतः
के के कानि वनान्यरण्यमहिषा नोन्मूलयेयुर्यतः
सिंहीस्नेहविलासबद्धवसतिः पञ्चाननो वर्तते ॥ 79

इदमपि दूषणं न चारु ।

समता मार्गाभेदः । यया रीत्योपक्रम स्तया समापनं गुणः । अयं पतत्प्रकर्ष स्तदभाव एव न दोषः । ननु वैपरीत्यमेव कुतो न स्या दिति चेत् यत्र पश्चात् प्रकर्ष स्तत्र पतत्प्रकर्षाभावेऽपि समताया अभावात् । यथा –

मातङ्गाः किमु वल्गितैः किमफलैराडंबरैर्जंबुकाः
सारङ्गा महिषा मदं व्रजथ किं शून्येषु शूरा न के ।
कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारेः पुरः
सिन्धुध्वानिनि हुंकृते स्फुरति यत्तद्गर्जितं गर्जितम् ॥ 80

अत्र सिंहाभिधाने प्रकर्षो गुणः ।

समाप्तपुनरात्तं यत्र विशेष्यं समाप्तं जनितान्वयबोधं पुनरात्तं आवृत्तं; तद्यथा —

क्रेङ्कारः स्मरकार्मुकस्य सुरतक्रीडापिकीनां रवो
झङ्कारो रतिमञ्जरीमधुलिहां लीलाचकोरीध्वनिः ।
तन्व्याः कञ्चुलिकापसारणभुजाक्षेपस्खलत्कङ्कण-
क्वाणः प्रेम तनोतु वो नववयोलास्याय वेणुस्वनः ॥ 81

अयमपि दोषो न साधुः । यतः क्रियाकारकभावेनान्वयबोधे जाते पुनर्विशेषणान्वये निराकांक्षत्वमेव दूषकताबीजं वाच्यम्, तत्तु न घटते । पुनर्विशेषणांशे तात्पर्यसत्त्वेन तात्पर्यविषयीभूतान्वयबोधाजननेन तद्घटिताया आकांक्षायाः सत्त्वात् ।

अर्धान्तरैकवाचकं द्वितीयार्धगतैकवाचकशेषप्रथमार्धम् । यथा —

मसृणचरणपातं गम्यतां भूः सदर्भा
विरचय सिचयान्तं मूर्ध्नि घर्मः कठोरः ।
तदिति जनकपुत्री लोचनैरश्रुपूर्णैः
पथि पथिकवधूभिर्वीक्षिता शिक्षिता च ॥ 82

अत्र भूः सदर्भा, तन्मसृणचरणपातं गम्यतामित्यन्वये अनासत्तिरेव दूषकताबीजम् । तन्नसाधु । अस्थानस्थपद एवान्तर्भावात् ।

अभवन् मत इष्टो योगः संबन्धो यत्र तत्र तत्तथा । यथा —

जंघाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः
प्रत्यग्रालक्तकाभाप्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः ।
भर्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापी-
संभूतांभोजशोभां विदधदभिनवो दण्डपादो भवान्याः ॥ 83

अत्र दण्डपादगता निजतनुः प्रतीयते। भवानीसंबन्धिनीतु विवक्षिता। निजस्वात्मादिशब्दानां प्रधानक्रियान्वितान्वयित्वव्युत्पत्तेः। इदमपि न साधु। काव्याकाव्यसाधारणस्यास्य दूषणस्य काव्ये विशिष्योत्कीर्तनस्यान्याय्यत्वात्।

अनभिहितवाच्यं तत् अवश्यवाच्य मनुक्तं यत्र। यथा – 'त्वयि निबद्धरतेः प्रियवादिनः प्रणयभङ्ग' इत्यादि। इदमपि न साधु। न्यूनपद एवास्यान्तर्भावात्। न च न्यूनपदं वाचकपदघटितम; अनभिहितवाच्यं तु द्योतकशब्दघटित मित्यनयो र्भेदो वक्तव्य इति वाच्यम। यत एतादृशि यत्किञ्चिद्भेदकल्पने दोषाणा मानन्त्यं स्यात्।

अपदस्थपदेति। अपदस्थपदं अस्थानस्थपदम्। यथा –

प्रियेण संग्रथ्य विपक्षसन्निधौ
उपाहितां वक्षसि पीवरस्तने।
स्रजं न काचि द्विजहौ जलाविलां
वसन्ति हि प्रेम्णि गुणा न वस्तुनि॥ 84

अत्र काचि न्न विजहा विति वाच्यम्। इदमपि न साधु। अत्रानासत्तिज्ञानमेव दूषकताबीजम्। तस्य च काव्याकाव्यसाधारणदूषणस्य काव्ये विशिष्य कथनस्याचारुत्वात्। अपदसमासमिति। इदमपि न चारु। वर्णवत् समासस्यापि व्यञ्जकतायाः सर्वसंमतत्वाभावात्।

सङ्कीर्णं तत् यत्र वाक्यान्तरपदानि वाक्यान्तरेऽनुप्रविशन्ति। यथा –

किमिति न पश्यसि कोपं पादानतं बहुगुणं गृहाणेमम्।
ननु मुञ्च हृदयनाथं कण्ठे मनस स्तमोरूपम्॥ 85

अथ गर्भितं तत् यत्र वाक्यस्य मध्ये वाक्यान्तर मनुप्रविशति। यथा –

परापवादनिरतै र्दुर्जनै स्सह सङ्गतिः।
वदामि भवत स्तत्त्वं न विधेया कदाचन॥ 86

अत्र तृतीयपादो वाक्यान्तरमध्ये अनुप्रविष्टः।

एव मविद्यमानः क्रमो यत्र त दक्रमम् । यथा – 'द्वयं गतं संप्रति शोचनीयताम्' इत्यादि । अत्र त्वंशब्दादनन्तरं चकारो युक्तः । तदैव तस्याः समुच्चेयताप्रतीतिः । एतानि त्रीणि न पृथग्दूषणानि । अपदस्थपद एतेषा मन्तर्भावात् । एवं प्रसिद्धिहतभग्नप्रक्रमामतपरार्थाना मनुचितार्थ एवान्तर्भावात् न पृथ ग्दूषणत्वम् । एतेषां क्रमेणोदाहरणानि । यथा –

महाप्रलयमारुतक्षुभितपुष्कलावर्तक-
प्रचण्डघनगर्जितप्रतिरवानुकारी मुहुः ।
रवः श्रवणभैरवः स्थगितरोदसीकन्दरः
कुतोऽद्य समरोदधे रय मभूतपूर्वः पुरः ॥ 87

अत्र रवो मण्डूकादिध्वनिषु प्रसिद्धः न तूक्तविशेषे सिंहनादे ।

भग्नप्रक्रमो यथा –

नाथे निशाया नियतेर्नियोगा-
दस्तंगते हन्त निशापि याता ।
कुलाङ्गनानां हि दशानुरूपं
नातः परं भद्रतरं समस्ति ॥ 88

अत्र गतेति प्रक्रान्तं यातेति प्रकृतं, तेन प्रकृतेः प्रक्रमो भग्नः ।

अमतपरार्थं यथा –

राममन्मथशरेण ताडिता
दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता
जीवितेशवसतिं जगाम सा ॥ 89

इत्यत्र प्रकृतरसे विरुद्धस्य शृङ्गारस्य व्यञ्जकोऽपरोऽर्थः । एतेषा मनुचितार्थतात्प्युक्तेश्च । तत एतेषा मन्तर्भावोऽनुचितार्थे युक्तः ।

अथार्थदोषाः –

**अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्क्रमग्राम्याः ॥**
**सन्दिग्धो निर्हेतुः प्रसिद्धि विद्याविरुद्धश्च ।**
**अनवीकृतः सनियमानियमविशेषा विशेष परिवृत्ताः ।**
**साकांक्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः ।**
**विध्यनुवादायुक्त स्त्यक्तपुनःस्वीकृतोऽश्लीलः ॥** K.P. VII. 55-57.

दुष्ट इति संबध्यते। एते प्राचीनैरुक्ता स्तैरेवोक्तेषु पदादिदोषेषु अन्तर्भवन्तीति न पृथक् प्रतिपादन मर्हन्ति। तथा हि - पुष्टं पोषण मुत्कर्षः। न विद्यते पुष्टं यत्रेति नञ्समासः। तथा च प्रकृतवाक्योद्देश्योत्कर्षाहेतुत्वरूपस्यापुष्टार्थस्य, एवं पुनरुक्तस्य चाधिकपदे निरर्थके चान्तर्भावः। तथा कष्टस्य क्लिष्ट एवान्तर्भावः। एवं स्तुत्वा निन्दित्वा वा पुन रन्यथाकृतरूपस्य व्याहतस्य तथा दुष्क्रमग्राम्याप्रसिद्धविद्याविरुद्धापदमुक्ताश्लीलाना मेव मेकसमभिव्याहारनिर्दिष्टोत्तममध्यमाधमरूपस्य सहचरभिन्नस्य तथा विधेयविरोध्यनुवादरूपस्यानुवादायुक्तस्य तथा प्रकाशितविरुद्धस्यानुचितार्थ एवान्तर्भावः। तथा सन्दिग्धस्य सन्दिग्ध एवान्तर्भावः। एव मेकभङ्गिनिर्दिष्टानेकार्थत्वरूप मनवीकृतत्वं न दोषः किं तु गुणाभावः। उक्तिवैचित्र्यात्मकमाधुर्यस्य नवीकृतत्वरूपस्य गुणस्य वक्ष्यमाणत्वात्। ततोऽनवीकृते गुणाभावादेव रसापकर्ष इति। एवं निर्हेतुनियमपरिवृत्तविशेषपरिवृत्तसाकांक्षाणां न्यूनपद एवान्तर्भावः। तथा अनियमपरिवृत्तस्याधिकपदे, तथा विध्ययुक्तस्य विधेयाविमर्शे, तथा त्यक्तपुनःस्वीकृतस्य समाप्तपुनरात्तेऽन्तर्भावः। नन्वेव मधिकपदादीनामपि निरर्थकादि ष्वन्तर्भावः स्या दिति चेत्-भवतु नाम का नो हानिः।

अथापुष्टादीना मुदाहरणानि लिख्यन्ते। अपुष्टो यथा —

अतिविततगगनसरणिप्रसरणपरिमुक्तविश्रमानन्दः।
मरुदुल्लासितसौरभकमलाकरहासकृ द्रवि र्जयति॥ 90

अत्रातिविततत्वादयोऽर्था अपुष्टाः, प्रकृतवाक्योद्देश्यस्य रवे रुत्कर्षस्य तै रप्रतिपादनात्।

कष्टो यथा

सदा मध्ये यासा मिय ममृतनिस्यन्दसरसा
सरस्व त्युद्दामा वहति बहुमार्गा परिमलम्।
प्रसादं ता एता घनपरिचिताः केन महतां
महाकाव्यव्योम्नि स्फुरितमधुरा यांतु रुचयः॥ 91

अस्यार्थः — अमृतं सुधा जलं च, रसो माधुर्यं शृङ्गारादिश्च, सरस्वती वाणी नदी च, उद्दामा प्रौढा महती च, पन्थाश्च मार्गा रीतिः, परिमलं चमत्कारं सुखं

च, प्रसादं सुव्यक्तत्वं स्वच्छकान्तिश्च, घनो निबिडो मेघश्च, परिचिता अत्यन्ताभ्यस्ताः संवद्धाश्च, रुचयः अभिसन्धयः कान्तयश्च, महतां कवीनां आदित्यादीनां तेषां द्वादशत्वात्। अत्रार्थप्रतीति विलंबेनेति क्लिष्टेऽस्यान्तर्भावः समुचित इति।

व्याहतं यथा --

जगति जयिन स्ते ते भावाः नवेन्दुकलादयः
प्रकृतिमधुराः सन्त्ये वान्ये मनो मदयन्ति ये।
मम तु य दियं याता लोके विलोचनचन्द्रिका
नयनविषयं जन्म न्येकः स एव महोत्सवः॥ 92

इत्यत्र नवेन्दुकलादयो यं प्रति पश्पशप्रायाः स एव चन्द्रिकात्व मुत्कर्षार्थमारोपयतीति व्याहतत्व मितीदम प्यनुचितार्थम्।

दुष्क्रमो यथा –

भूपालरत्न निर्दैन्यप्रदानप्रथितोत्सव।
विश्राणय तुरङ्गं मे मातङ्गं वा मदालसम्॥ 93

अत्र मातङ्गस्य प्राङ्निर्देश उचितः इतीद मनुचितार्थम्।

ग्राम्यो ग्रामसंभवोऽविदग्धप्रयोज्यः स्वरिरंसादिः। यथा –

स्वपिति यावदयं निकटे जनः
स्वपिमि तावदहं किमपैति ते।
तदयि सांप्रत माहर कूर्पर
त्वरित मूरु मुदञ्चय कुञ्चितम्॥ 94

इदम प्यनुचितार्थम्।

प्रसिद्धिविरुद्धेति। उदाहरणं तु पूर्वमेव प्रसिद्धिपरिहाने दत्तम् 'महाप्रलय' इत्यादि। तदेव मन्तव्यम्। अत्र रवः शब्दः सिंहनादे अनुचित इतीद मप्यनुचितार्थम्।

विद्याविरुद्धेति। यथा –

मदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः।
नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च॥ 95

अत्र ग्रहोपरागादिकं विना रात्रौ स्नानं धर्मशास्त्रे निषिद्ध मितीदम प्यनुचितार्थम् ।

[1]अपदमुक्तेति यथा –

आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षु र्नवं
भक्ति र्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी ।
उत्पत्ति र्द्रुहिणान्वये च त दहो ने दृग्वरो लभ्यते
स्याच्चे देष न रावण: क्वनु पुन: सर्वत्र सर्वे गुणा: ॥ 96

अत्र 'स्याच्चे देष न रावण:' इत्येतावतैव समाप्यम् । तथा हि – अत्र रावणं प्र त्युपेक्षा वाक्यार्थ: स्याच्चे देष न रावण: इत्यन्तेनैव प्राप्त: , क्व नु पुनरित्यादिना समर्थनं नाकांक्षतीति इदम प्यनुचितार्थम् ।

अश्लीलानामपि । यथा

हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिण: ।
यथाऽऽशु जायते पातो न तथा पुन रुन्नति: ॥ 97

अत्र पुंव्यञ्जनस्यापि प्रतीति रितीदम प्यनुचितार्थम् । एव मेकसमभिव्याहारेत्यादि । यथा

श्रुतेन बुद्धि र्व्यसनेन मूर्खता
मदेन नारी सलिलेन निम्नगा ।
निशा शशाङ्केन धृति: समाधिना
नयेन चालङ्क्रियते नरेन्द्रता ॥ 98

अत्र श्रुतिबुद्ध्यादिभि रुत्कृष्टसहचरै र्व्यसनमूर्खतयो र्भिन्नत्व मितीदम प्यनुचितार्थम् । तथा विधेयाविमर्शाद्यनुवादरूपस्येति । यथा –

---

1. अपदयुक्त: – अपदे अस्थाने युक्त: K.Pr.
अपदमुक्तत्वं – अस्थानसमाप्यत्वम् K. Prakasakhandanam.
Kavyaprakasakhandanam also says as follows —
केचित्तु प्रकृतार्थकं विरुद्धार्थकापदगालितम् ।
अपदयुक्तत्वं तेन अपदयुक्तत्वमेव पाठ इत्याहु: ॥ Page 52.
K.Pa. gives अपदयुक्त only. Page 54.

[1]अरे रामाहस्ताभरण भसलश्रेणिशरण
स्मरक्रीडाव्रीडाशमन विरहिप्राणदमन ।
सरोहंसोत्तंस प्रचलदल नीलोत्पल सखे
सखेदोऽहं मोहं श्लथय कथय क्वेन्दुवदना ॥ 99

अत्र विरहिणः पुरूरवसो मोहश्लथने विधेये विरहिप्राणदमनत्वे नानुवादो नोचित इतीदमपि अनुचितार्थम् ।

तथा प्रकाशितविरुद्धस्येति यथा –

लग्नं रागावृताङ्ग्या सुदृढ मिह यथै वासियष्ट्याऽरिकण्ठे
मातङ्गाना मपीहोपरि परपुरुषै र्या च दृष्टा पतन्ती ।
तत्सक्तोऽयं न किञ्चिद् गणयति विदितं तेऽस्तु ते नास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद् गदितुमिव गते त्यंबुधिं यस्य कीर्तिः ॥ 100

अत्र विदितं तेऽस्त्वि त्यनेन वेदयितव्यानुचितार्थाभिधानेन क्रोधाभिव्यक्तेः श्री स्तस्मा दपसरतीति विरुद्धं प्रकाश्यते, इद मप्यनुचितार्थ मिति युक्त मेतेषा-मनुचितार्थेऽन्तर्भावः । सन्दिग्धस्य संन्दिग्ध एवान्तर्भावः । उदाहरणं तु – 'आलिङ्गित स्तत्रभवान्' इत्यादि प्रागुक्तम् ।

ततोऽनवीकृतो गुणाभावा दित्यादि यथा –

प्राप्ताः श्रियः सकलकामदुघा स्ततः किं
दत्तं पदं शिरसि विद्विषतां ततः किम् ।
[2]सन्तर्पिताः प्रणयिनो विभवै स्ततः किं
कल्पं स्थितं तनुभृतां तनुभि स्ततः किम् ॥ 101

निर्हेतुनियमपरिवृत्तेत्यादि । एतेषां क्रमेणोदाहरणानि –

गृहीतं येनासीः परिभवभया न्नोचितमपि
प्रभावा द्यस्याभू न्न खलु तव कश्चि न्न विषयः ।
परित्यक्तं तेन त्वमसि सुतशोका न्नतु भया-
द्विमोक्ष्ये शस्त्र त्वा महमपि यतः स्वस्ति भवते ॥ 102

---

1. Chakravarti, Maheswara, Srivatsalanchana, Vidyanatha, Bhimasena and Nagoji Bhatta are of the opinion that this verse is from the Vikramorvasiyam of Kālidāsa. (But it is not to be found) in the available editions.

2. संमानिताः (Pt. ed.)

अत्र द्वितीयशस्त्रमोचने हेतु र्नोपात्तः।

नियमपरिवृत्तेति। नियमस्य शब्दा दप्रतिपत्तिः नियमपरिवृत्तः। यथा –

यत्रानुल्लिखिताख्यमेव [1]सकलं निर्माण मेत द्विधे
रुत्कर्षप्रतियोगिकल्पनमपि न्यक्कारकोटिः परा।
याताः प्राणभृतां मनोरथगतो रुल्लंघ्य यत्संपद-
स्तस्याऽऽभासमणीकृताश्मसु मणे रश्मत्व मेवोचितम्॥ 103

अनुल्लिखिताख्य मनिर्दिष्टनामकम्। अत्र 'छायामात्रमणीकृताश्मसु मणे स्तस्याश्मतैवोचिता' इति सनियमत्वं वाच्यम्। तथा कृते गुणान्तरव्यवच्छेदेन निन्दातिशयप्रतीतेः। प्राकृतमणिगणनायां चिन्तामणे र्गणन मनुचित मेवेत्यर्थः कवितात्पर्यविषयः सिध्यति।

विशेषपरिवृत्तेति। यथा –

श्यामां श्यामलिमान मानयत भोः सान्द्रै र्मषीकूर्चकैः
मन्त्रं तन्त्र मथ प्रयुज्य हरत श्वेतोत्पलानां श्रियम्।
चन्द्रं चूर्णयत क्षणाच्च कणशः कृत्वा शिलापट्टके
येन द्रष्टु महं क्षमे दश दिश स्तद्वक्त्रमुद्राङ्किताः॥ 104

अत्र ज्योत्स्ना मिति श्यामाविशेषो वाच्यः।

अविशेषपरिवृत्तेति यथा –

कल्लोलवेल्लितदृषत्परुषप्रहारै
रत्ना न्यमूनि मकरालय माऽवमंस्थाः।
किं कौस्तुभेन विहितो भवतो न नाम
याच्ञाप्रसारितकरः पुरुषोत्तमोऽपि॥ 105

अत्र 'एकेन किं न विहितो [2]भवतो न नाम' इति सामान्यं वाच्यम्।

साकांक्षाणामिति। अनुपात्तार्थकाकांक्षाविषयार्थत्वं साकांक्षत्वम्। यथा –

1. निखिलं। K.Pa. P. 53.

2. 'भवतः स नामे' K.P. and K.Pa. P. 54.

अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभोः प्रत्युत
द्रुह्यन् दाशरथिं विरुद्धचरितो युक्त स्तया कन्यया ।
उत्कर्षं च परस्य मानयशसो विस्रंसनं चात्मनः
स्त्रीरत्नं च जगत्पति र्दशमुखो देवः कथं मृष्यति ॥ 106

अत्र स्त्रीरत्न मुपेक्षितुं इत्याकांक्षति । अन्यथा स्त्रीरत्न मिति कथं मृष्यतीत्यनेनानन्वितं स्यात् । तथा हि कथं मृष्यतीत्यस्य कथं न द्वेष्टीत्यर्थः स्यात् । मृषधातो र्द्वेषार्थत्वात् । तथा च स्त्रीरत्नस्य द्वेषायोग्यत्वे कथं कथ मित्यादिनान्वयः । ततश्च न्यूनपद एव साकांक्षत्वस्यान्तर्भावः समुचितः ।

नियमपरिवृत्तस्येति । अविवक्षितनियमस्य शब्देन प्रतिपादन मनियमपरिवृत्तः । यथा –

वक्त्रांभोजं सरस्वत्यधिवसति सदा शोण एवाधर स्ते
बाहुः काकुत्स्थवीर्यस्मृतिकरणपटु र्दक्षिण स्ते समुद्रः ।
वाहिन्यः पार्श्व मेताः [1]क्षणमपि भवतो नैव मुञ्चन्त्यभीक्ष्णं
[2]स्वच्छेऽन्तर्मानसेऽस्मिन् कथ मवनिपते तेऽम्बुपानाभिलाषः ॥ 107

अस्यार्थः । सरस्वती भारती नदीभेदश्च, शोणो रक्तः नदश्च, सादृश्यात् सेतुबन्धदर्शनाच्च काकुत्स्थवीर्यस्मरणम् । दक्षिणः सव्येतरः दिग्विशेषश्च, समुद्रो मुद्राङ्गुलीयकं तत्सहितो जलधिश्च, वाहिन्यः सेनाः नद्यश्च, मानसे मनसि सरसि च । अत्र शोण एवेति नियमो न वाच्यः । पिपासो र्जलमात्राभिलाषेण नद्यन्तरव्यवच्छेदस्याविवक्षितत्वात् ।

तथा विध्ययुक्तस्येति ।

वाताहारतया जग द्विषधरै राश्वास्य निःशेषितं
ते ग्रस्ताः पुन रभ्रतोयकणिकातीव्रव्रतै र्बर्हिभिः ।
तेऽपि क्रूरचमूरुचर्मवसनै र्नीताः क्षयं लुब्धकैः
दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणा नीहते ॥ 108

अत्र जगन्ति निःशेषयितुं वाताहारचमत्कारत्व माचरित मित्याद्यर्थे दम्भस्य स्फुरितमित्याद्यर्थे दम्भस्य स्फुरित मित्याद्यर्थान्तरन्यासे स्वरसेन विवक्षणीये व्युत्क्रमाभिधानेन विधेयायुक्तत्वम् । तथा चाऽस्य स्फुट एव विधेयाविमर्शेऽन्तर्भावः ।

1. कथमपि 2. स्वच्छे चित्ते कुतोऽभू त्कथय नरपते (Pt. ed.)

तथा त्यक्तपुनःस्वीकृतस्येति । अस्यार्थः । त्यक्त उपसंहृतैकदेशः पुनःस्वीकृतः प्रकाशितैकदेशः । यथा 'लग्नं रागावृताङ्ग्या' इत्यत्र विदितं तेऽस्त्वि त्यनेन यावतोऽर्थान् निवेद्या ननिवेद्यैव मध्ये उपसंहाराभिधानात् । तथा चात्र समाप्तपुनरात्तत्वावृत्तिकल्पन मुत्थाप्याकांक्षत्वं च दूषकताबीजमित्येतयो रभेदो न्याय्यः ।

अथ रसदोषा नाह –

**व्यभिचारिरसस्थायिभावानां शब्दवाच्यता ।**
**कष्टकल्पनया व्यक्ति रनुभावविभावयोः ॥**
**प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः ।**
**अकाण्डे प्रथनच्छेदा वङ्गस्याप्यतिविस्तृतिः ॥**
**अङ्गिनोऽननुसंधानं प्रकृतीनां विपर्ययः ।**
**अनङ्गस्याभिधानञ्च रसे दोषाः स्यु रीदृशाः ॥** KP. VII. 60–62.

व्यभिचार्यादीनां स्वशब्दोपादाने यथाक्रमं [1]भावध्वनित्वं रसत्वं च न स्यात् । व्यञ्जितानामेव व्यभिचार्यादीनां तत्तद्रूपापायत्वात् । अत एवोक्तं 'व्यभिचारी तथाञ्जितो भावः प्रोक्तः' इति । तथा 'अभिव्यक्त श्चमत्कारकारी शृङ्गारादिको रस' इति । एवं 'व्यक्तः स तैः' इत्यादि च । एवं स त्येतेषां प्रधानकाव्यत्वं भवति । एत त्सर्वं व्यञ्जनावृत्ते र्माहात्म्यम् । तत्र प्रमाणं तु सहृदयहृदयमेव ।

व्यभिचारिणः स्वशब्देनोपादानं यथा --

सव्रीडा दयितानने सकरुणा मातङ्गचर्माम्बरे
सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि ।
सेर्ष्या जह्नुसुतावलोकनविधौ दीना कपालोदरे
पार्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायास्तु वः ॥ 109

[2]अत्र व्रीडादीनाम्

व्यानम्रा दयितानने मुकुलिता मातङ्गचर्माम्बरे
सोत्कम्पा भुजगे निमेषरहिता चन्द्रेऽमृतस्यन्दिनि ।
मीलद्भ्रूः सुरसिन्धुदर्शनविधौ म्लाना कपालोदरे
.... .... 110

1. भावध्वनित्वं चमत्कारत्वं रसत्वं च न स्यात् (क)
2. अत्र व्रीडादीनां शब्दवाच्यता (क)

इत्यादि युक्तम् एवं कृते व्रीडादीनां व्यङ्ग्यत्वसिद्धेः। एवं रसस्य स्वशब्देन शृङ्गारादिशब्देन वा वाच्यत्वम्। क्रमेण यथा –

तामनङ्गजयमङ्गलश्रियं किञ्चिदुच्चभुजमूललोकिताम्।
नेत्रयोः कृतवतोऽस्य गोचरे कोऽप्यजायत रसो निरन्तरः॥ 111

आलोक्य कोमलकपोलतलाभिषिक्त-
व्यक्तानुरागसुभगामभिराममूर्तिम्।
पश्यैष बाल्यमतिवृत्य विवर्तमानः
शृङ्गारसीमनि तरङ्गितमातनोति॥ 112

स्थायिनो यथा –

संप्रहारे प्रहरणैः प्रहाराणां परस्परम्।
ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोऽप्यभूत्॥ 113

अत्रोत्साहस्य। अत्र दुर्दुरूढाः प्रत्यवतिष्ठन्ते। व्यभिचार्यादीनां स्वशब्दवाच्यता न दोषायापितु गुणायैव, तत्तदर्थानां शीघ्रोपस्थितिहेतुत्वात्। अत एव महाकवीनां तथैवोपनिबन्धात्। यथा –

दूरादुत्सुकमागते विवलितं संभाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने किञ्चाञ्चितभ्रूलतम्।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि॥ 114

अत्रोत्सुकमित्यौत्सुक्यस्य स्वशब्दवाच्यता। यथा वा –

प्रातः पुनः स्यादुदयश्च भानोः
पश्येम कोदण्डमनाततज्यम्।
इत्युत्सुकस्तत्र स रामभद्रो
निद्रादरिद्रो रजनीमनैषीत्॥ 115

अत्राप्यौत्सुक्यम्। तथा –

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः
दृष्ट्वाग्रे शिवमात्तसाध्वसरसा गौरी नवे सङ्गमे
संरोहत्पुलका हरेण हसताऽऽश्लिष्टा शिवायास्तु नः। 116

अत्राप्यौत्सुक्यस्य।

यथा वा –

त्व मग्रत: सञ्चर चञ्चलाक्षि
त्वमेव जीवेश्वर निस्सराग्रे ।
इति ब्रुव द्वेश्मनि वह्निदीप्ते
मिथोऽनुरागा न्मिथुनं विपन्नम् ॥ 117

अत्रानुरागस्य ।

यथा वा –

त्वय्यर्धासनभाजि किन्नरगणोद्गीतैर्भवद्विक्रमै:
अन्तस्सम्भृतमत्सरोऽपि भगवा नाकारगुप्तौ कृती ।
उन्मीलद्भवदीयदक्षिणभुजारोमाञ्चविद्धोच्चर-
द्दाप्यैरेव विलोचनै रभिनय त्यानन्द माखण्डल: ॥ 118

अत्राकारगुप्ते: । अथ व्रीडाद्यनुभावै र्विवलितत्वाद्यै: व्रीडादिव दौत्सुक्यानुभावै: सहसाप्रसारणाद्यै रौत्सुक्यादिकं झटिति प्रत्याययितुं न शक्यत इति औत्सुक्यादीनां झटिति प्रत्ययहेतुत्वात् स्वशब्दवाच्यतेति चेन्न; एतस्यार्थस्य शपथेन प्रत्याययितुं शक्यत्वात् । अपि च तर्हि सिद्धं व्यभिचार्यादीनां झटिति प्रत्ययहेतुत्वात् स्वशब्दवाच्यता न दोषाय किंतु गुणायेति ।

कष्टकल्पनयेति । अस्या: क्लिष्ट एवान्तर्भाव: ।

प्रतिकूलविभावादीति । यथा –

त्यजत मान मलं बत विग्रहै र्न पुन रेति गतं चतुरं वय: ।
परिभृताभि रितीव निवेदिते स्मरमते रमते स्म वधूजन: ॥ 119

अत्र शृङ्गारे प्रतिकूलस्य शान्तस्यानित्यताप्रकाशकरूपो विभाव:, तत्प्रकाशितो निर्वेदश्च व्यभिचारी उपात्त: समूलं शृङ्गार मुन्मूलयति ।

दीप्ति: पुन: पुन: विच्छिद्य विच्छिद्य ग्रहणं, यथा कुमारसंभवे रतिविलापे ।

अकाण्डे प्रथनम् यथा – वेणीसंहारे द्वितीयेऽङ्के, अनेकसंक्षये वृत्ते भानुमत्या सह दुर्योधनस्य शृङ्गारवर्णने ।

'अकाण्डे छेदो' यथा – वीरचरिते द्वितीयेऽङ्के राघवभार्गवयोः धाराधिरूढे वीररसे कङ्कणमोचनाय गच्छामीति राघवस्योक्तौ।

अङ्गस्याप्रधानस्यातिविस्तरेण वर्णनं यथा – हयग्रीववधे हयग्रीवस्य।

अङ्गिनोऽननुसन्धानं यथा – रत्नावल्यां बाभ्रव्यागमने सागरिकाया विस्मृतिः।

प्रकृतीनां विपर्ययः यथा – धीरोदात्तधीरोद्धतादीनां अन्यथा लोकशास्त्रातिक्रमेण वर्णनम्। अनङ्गस्य रसानुपकारकस्याभिधानं कथनम्, यथा – 'कर्पूरमञ्जर्यां नायिकया आत्मना च कृतं वसन्तवर्णन मनादृत्य वन्दिवर्णितस्य राज्ञः प्रशंसनम्।

ईदृशा इति। नायिकापादप्रहारादिना नायककोपवर्णनमिति। एते प्रतिकूलविभावादि इत्यारभ्य ईदृशा इत्यन्ता अनुपितार्थं एवान्तर्भूताः। अत एवोक्तं ध्वनिकृता संक्षेपेण –

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा॥ 120

॥ इति काव्यामृते दोषनिर्णयो नाम पञ्चम उल्लासः॥

# षष्ठोल्लासः

अथ काव्यप्रकाशकारोक्तगुणान् खण्डयामः । स एवं ब्रूते –

**ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।**

**उत्कर्षहेतवस्ते स्यु रचलस्थितयो गुणाः ॥** K.P. VIII. 66.

गुणानां वर्णगतत्वं निरस्यति अचलस्थितय इति । अचला नियता स्थिति र्येषां ते । तथा च गुणा रसं विना नावतिष्ठन्ते इति रसधर्मा एव ते इत्यर्थः पर्यवसितः । तेन गुणाना मलङ्कारेभ्यो भेदो दर्शितः । ते तु रसं विनाप्यवतिष्ठन्ते । यथा –

अलिरिव नलिनान्तर्घूर्णमानो निगूढं
कलयति कवितायाः सज्जनो वस्तुसारम् ।
लवमपि कलनीयं नानुरुन्धे प्रबन्धे
प्रतिपद मवरुन्धे शृङ्खलेवानुवारम् ॥ 121

अपि च यदि गुणा माधुर्यादयो रसधर्मा न स्युः, किंतु वर्णमात्राश्रिता स्तदा मधुरो रसो वर्णाश्च मधुरा स्तत्र रसे माधुर्यव्यवहारः स्यात् । तथा यत्र मधुरो रसो अमधुराश्च वर्णा, स्तत्र माधुर्यव्यवहारो न स्या दिति गुणा रसधर्मा एवेति स्थितम् । इदानीं गुणानां भेदक माह –

**माधुर्योजःप्रसादाख्या स्त्रय स्ते न पुन र्दश ।** K.P. VIII. 68.

एतेषां क्रमेण लक्षण माह –

**आह्लादकत्वं माधुर्य शृङ्गारे द्रुतिकारणम् ॥**

**करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् ।**

**दीप्त्यात्मविस्तृते र्हेतु रोजो वीररसस्थिति ॥** K.P. VIII. 68-69.

चित्तस्य विस्ताररूपदीप्तिहेतुः ओजः ।

**बीभत्सरौद्ररसयो स्तस्याधिक्यं क्रमेण च ।**

**शुष्केन्धनाग्निवत् स्वच्छजलवत् सहसैव यः ॥**

**व्याप्नो त्यन्य त्प्रसादोऽसौ सर्वत्र विहितस्थितिः ।** K.P. VIII. 70-71.

अन्यदिति व्याप्य मिह चिन्त्यम् ।

**गुणवृत्त्या पुन स्तेषां वृत्तिः शब्दार्थयो र्मता ।** K.P. VIII. 71.

गुणवृत्त्या उपचारेण । तेषां गुणानां । तथा चैवंस्वरूपा एव त्रयो गुणाः स्वीकार्याः । न पुनः प्राचां सम्मता दश गुणा इत्याह न पुन र्दशेति । ते तु वक्ष्यन्ते । अथैषां व्यञ्जका नाह –

**वर्णाः समासो रचना तेषां व्यञ्जकता मिताः ॥** K.P. VIII. 73.

के ते इत्याह –

**मूर्ध्नि वर्गान्त्यगाः स्पर्शाः अटवर्गा रणौ लघू ।**
**अवृत्ति र्मध्यवृत्ति र्वा माधुर्ये घटना तथा ॥** K.P. VIII. 74.

शिरसि निजवर्गान्त्ययुक्ताः स्पर्शाः कादयो मावसानाः । उदा –

अमन्दमुन्दरीगणै रनिन्द्यचन्दनानिले ।
कलिन्दनन्दिनीतटे ननन्द नन्दनन्दनः ॥ 122

एतादृश्येव घटना वैदर्भी ।

**योग आद्यतृतीयाभ्या मन्त्ययो रेण तुल्ययोः ।**
**टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि ॥** K.P. VIII. 75.

उदा –

अस्मद्दोर्मूलकूलङ्कष विषमभुजग्रन्थि भङ्गप्रसङ्ग-
कौशलल‍ङ्केशदत्त त्रिभुवनविजयख्यातिसर्वस्वदायः ।
यः कश्चि द्विक्रमार्थ्यं स खलु करचुलिक्षत्रसाधारणत्वा-
दन्तामन्दायमानो विजितभृगुपतिं त्वा मजित्वा दुनोत्ति ॥ 123

एवंविधा च घटना गौडी । अनेवंविधोभयरूपा घटना पाञ्चालीति बोध्यम् ।
यथा –

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे ॥ 124

त दपरे न क्षमन्ते । त ददोषौ शब्दार्थौ सगुणा विति तथा –

**अदोषं गुणव त्काव्य मलङ्कारै रलङ्कृतम् ।**
**रसान्वितं कविः कुर्वन् कीर्तिं स्वर्गं च विन्दति ॥**

तथा –

यदि हरिस्मरणे सरसं मनो
यदि विलासकलासु कुतूहलम् ।
मधुरकोमलकान्तपदावलिं
शृणु तदा जयदेवसरस्वतीम् ॥ 125

इत्यादिव्यवहारदर्शनात् गुणानां शब्दार्थवृत्तित्व मुपचारं विनैव कलयतां किं रसधर्मत्वकल्पना[1]दुर्वासनेनेति । न, अनुक्तमेवात्र रसधर्मत्वं विना माधुर्यादिव्यवहारः अव्यवस्थः स्या दिति चेत् । न, अनवबोधात् तथा ह्याह्लादकत्वं माधुर्यमित्युक्तं, तत्कथ माह्लादकरूपतया व्यवस्थिते रसे वर्तता मिति ; अथाह्लादकत्वमेवाह्लादकत्वं, तर्हि तत् सर्वरससाधारण मिति कथं रसविशेषे स्वीकृतम्, तस्य सुखत्वापरपर्यायस्य गुणत्वासंभवाच्च । न च तव मते रसे कथं माधुर्यव्यवस्थेति वाच्यम् । इत्यादि हेतुत्वेनेति ।

अथ प्राचां संमतान् काव्यप्रकाशकारखण्डितान् गुणान् पुन रुज्जीवयामः । के ते इत्याह ।

**श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।**
**अर्थव्यक्ति रुदारत्व मोजःकान्तिसमाधयः ॥**
**इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः ॥**

अथ तेषां लक्षण माह । बहूनां पदानामेकवद्भासनात्मा श्लेषः । तथा 'श्लिष्ट मस्पृष्टशैथिल्यम्' इति । यथा –

परिणतफलशङ्किपक्षिचञ्चू
पुटगलदिन्दुसुधाभि रात्तजात्रे ।
इह शरभहते मृगेन्द्रवृन्दे
धृतवपु रुज्झति दुद्रुवु र्द्विपेन्द्राः ॥ 126

यश्चारोहावरोहक्रमरूपः समाधिः । आरोहो गाढता ; अवरोहः शैथिल्यम् । तयोः क्रमेण घटन मारोहपूर्वकोऽवरोह स्तत्पूर्वक आरोहो वा यथा –

---

1. दुर्वासनेनेति....(क)

चञ्चद्भुजभ्रमित चण्डगदाभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।
स्त्यानावनद्धघनशोणितशोणपाणि:
रुत्तंसयिष्यति कचां स्तव देवि भीमः ॥ 127

अत्र चूर्णितान्ते आरोहः, सुयोधनान्ते अवरोहः । पुन स्तवान्ते पूर्वः, भीम इत्यन्तेऽपरः । या पदानां विच्छेदा नृत्यप्रायत्वं तत् चमत्कारविशेषाधायकत्वं सोदारता । यथा –

नमन्नृपतिमण्डलीमुकुटचन्द्रिकादुर्दिन-
स्फुरच्चरणपल्लवप्रतिपदोक्तदोस्संपदा ।
अनेन समजेतरां तुरगमेधमुक्तभ्रम-
तुरङ्गमखुरचन्द्रकप्रकरदन्तुरा मेदिनी ॥ 128

न चैतेषां त्रयाणा मोजस्यन्तर्भाव इति वाच्यम् । उपाधेयसङ्करेऽप्युपाधीना-मसाङ्कर्यात् । ओजस्ताव द्गाढबन्धत्वम् । तच्च सहृदयहृदयसाक्षिकम् । माघ-काव्यादिषु प्रसिद्धं यथा –

मा पुन स्त मभिसीसर मागस्कारिणं मदविमोहितचित्ता ।
योषिदि त्यभिललाष न हालां दुस्त्यजः खलु सुखादपि मानः ॥ 129

प्रसादस्वरूप माह –

**"श्रुतिमात्रेण [1]शब्दानां येनार्थप्रत्ययो भवेत् ।**
**साधारणः समग्राणां स प्रसादो [2]गुणःस्मृतः ॥** K.P. VIII. 76.

समग्रादीनां घटनादीनां यथा –

पति रवनिपतिः सुत स्स रामो
विनयवती च वधूः क्रमेण लब्धा ।
अहह युगपदेवं सर्व मेतत्-
मम मुषितं विधिनातिनिर्घृणेन ॥ 130

---

1. शब्दात्तु K.P. (Pt. ed.)

2. गुणो मतः K.P. (Pt. ed.)

7

यथा वा –

दिशि दिशि परिहासगूढगर्भाः
पिशुनगिरो गुरुगर्जित श्च तादृक् ।
सहचरि हरये निवेदनीयं
भवदनुरोधवशा दयं विपाकः ॥ 131

अर्थव्यक्तिः झटित्यर्थसमर्पणम् । यथा –

चरणनिपतितः पति स्तवाऽयं
वयमपि जातु पराहताः सपत्न्या ।
कि मपर मवशिष्यते यदर्थं
कथय करोषि सरोरुहाक्षि मौनम् ॥ 132

न चानयो र्द्वयो रेकतरपरिग्रह एव कार्य इति वाच्यम् । यतोऽनयोः पदार्थ-वाक्यार्थप्रवेश मालम्ब्य भेदः कार्य इति ।

अथ समता मार्गाभेदः । यया रीत्योपक्रम स्तया समापनम् । यथा 'अमन्दसुन्दरीगणै' रित्यादि । ननु –

मातङ्गाः किमु वल्गितैः किमफलै राडम्बरै र्जम्बुकाः
सारङ्गा महिषा मदं व्रजथ किं शून्येषु शूरा न के ।
कोपाटोपसमुद्भटोत्कटसटाकोटे रिभारेः पुनः
सिन्धुध्वानिनि हुंकृते स्फुरति य त्तद्गर्जितं गर्जितम् ॥ 133

इत्यादौ सिंहाभिधाने मसृणवर्णत्यागो गुण इति, समताया अभावस्य गुणत्व मिति कथं तस्या गुणत्व मिति चेत्, वक्त्राद्यौचित्यवशा द्यथा दोषस्य क्वचि द्गुणत्वं तथा गुणस्यापि क्वचि द्दोषत्वे को वा दोष इति । समताया स्तु चमत्कारानुगुण्येन गुणत्वं प्रमाणसिद्ध मिति सर्वं सुस्थम् ।

अथ माधुर्यम् – तत्र पृथक्पदत्वं माधुर्यम् । पृथक् पदानि यस्य तत्त्वं पृथक्पदत्वम्; समासाभाव इत्यर्थः । इद मुपलक्षणम्; अल्पः समासो मध्यमः समासः श्रेयःनित्यः क्रमेणोदाहरणानि

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः ।
लुप्तं नामापि सीतेति न च रामो न जीवति ॥ 134

रहः सखीभिः शपथै रनेकै
    राप्रृच्छ्यमानापि नतानैनैव ।
स्मितेन लज्जामधुरेण गौरी
    निवेदयामास निजा मवस्थाम् ॥ 135

आश्लेषचुम्बनरतोत्सवकौतुकादि-
    क्रीडादुरोदरपणप्रतिभू रनङ्गः ।
भोगः स यद्यपि जये च पराजये च
    यूनो र्मन स्तदपि वाञ्छति जेतुमेव ॥ 136

अत्र समासेऽल्पत्वादिकं विदग्धव्यवहाराधीनमेव। अत्र माधुर्याविरोधिबहुतरवर्ण-साहित्ये अतीति विशेषणीयम्, अन्यथा "शुष्कं काष्ठं तिष्ठत्यग्र" इत्यत्राति-व्याप्तिः स्यात्। न चात्र काव्यत्वमेव नास्तीति वाच्यम्। यदातिंकृपणनिष्ठुर मधिकृत्येदं प्रयुज्यते तदाऽप्रस्तुतप्रशंसा मालम्ब्यास्य काव्यत्वसंभवात्।

अथ सुकुमारता सा च परुषेतरवर्णशालिता। परुषत्वं च ओजोव्यञ्ज-कत्वम्। यथा –

न स्पन्दते चन्दनगन्धवाहो
    न कोकिलः कूजति काननान्ते ।
स कोऽपि देशः सखि शीलितः किं
    न यत्र वा पल्लविनो रसालः ॥ 137

अथ कान्तिः। कान्तिरौज्ज्वल्यरूपा हालिकादिसाधारणपदविन्यासवैधुर्येणा-लौकिकशोभाशालिता। यथा –

उच्चैरुच्चैस्तरोच्चैस्तमरवपुरवती भध्यमा वभ्रुवर्ङ्गी
शृङ्गी सङ्गीत मङ्गीकृतमदनधनुर्ध्वानसङ्गीत मेतत्।
निर्ह्रादश्चापि वापीतटविपिनमिलच्चक्रवाकी पिकानां
धाराणां मौलिर्हाराचितमपि ललनायत्तचित्तं विधत्ते ॥ 138

न च सुकुमारताकान्ती कष्टत्वग्राम्यत्वदोषद्वयत्यागा देवाश्रिते न तु गुणाविति वाच्यम्। वैपरीत्यस्यापि सुवचत्वात्। अपि च कष्टत्व मोजोव्यञ्जकवर्णवत्वं, सुकुमारता तु मधुररसव्यञ्जकवर्णवत्वं, तथा चानयोः परस्परभावरूपत्वाभावात्

कथं कष्टत्वत्यागात् सुकुमारतापरिग्रहः। एव मविदग्धप्रयुक्तत्वरूपया ग्राम्यत्व-विदग्धप्रयुक्तरूपकान्त्योरपि बोध्यम्। तस्मा द्विनिगमकाभावात् द्वयोरेव दोष-गुणत्वं सिद्धम्। इति शब्दगुणा व्यवस्थापिताः।

अथार्थगुणानपि महाशयैः कृतोपलम्भान् प्रकाशयामः। तेषु श्लेष-स्तावत् क्रमकौटिल्यानुल्बणत्वोपपत्तिरूपघटनात्मा। अस्यार्थः – क्रमः क्रिया-परंपरा, कौटिल्यं विदग्धचेष्टितम्। स एव रूपं यस्या घटनायाः तद्रूपः। यथा –

धन्या केयं स्थिता ते शिरसि शशिकला किंनु नामैतद स्या
नामैवास्या स्तदेतत् परिचितमपि ते विस्मृतं कस्य हेतोः।
नारीं पृच्छामि नेन्दुं कथयतु विजया न प्रमाणं यदीन्दु-
र्देव्या निह्नोतु मिच्छो रिति सुरसरितं शाठ्य मव्या द्विभो र्वः॥ 139

यथा वा –

[1]एकत्रासनसंस्थिते प्रियतमे पश्चा दुपेत्यादरा-
देकस्या नयने [2]निमील्य विहितक्रीडानु[3]बन्धाकुलः।
[4]ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुंबति॥ 140

यथा वा –

दुर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा।
आसी द्विवृत्तवदना च विमोचयन्ती
शाखासु वल्कल मसक्तमपि द्रुमाणाम्॥ 141

इत्यादिषु बहुषु काव्येषु दर्शनाद्गुणत्वं निर्व्यूढमेव। न च वैचित्र्यमात्र मेत न्न गुण इति कस्य चि द्दूषण मत्रास्तीति वाच्यम्। अहो आचार्याणां परगुणद्वेषमहिमा, य द्गुणत्वसाधकमेव गुणत्वबाधकतयोपन्यस्यते। य द्वैचित्र्यस्य चमत्कारानु-

---

1. दृष्ट्वैकासनसंगते 2. पिधाय
3. बन्धच्छलः 4. तिर्यग्वक्रित – अमरुकम् Devadhar ed. 1959.

गुण्यस्य गुणत्वसाधकत्वात्। एव मेतेषा मन्यदपि वचनं न ग्राह्यम्। तथाहि – अपुष्टार्थत्वाधिकपदत्वानवीकृतत्वामाङ्गल्यरूपाश्लीलग्राम्याणां निराकरणेन सातिशयत्वरूपमोजः, अर्थवैमल्यं यावदर्थपदता प्रसादः, एकस्यार्थस्य भङ्ग्यन्तरेण कथनरूप मुक्तिवैचित्र्यरूपं माधुर्यम्, अपारुष्यरूपं सौकुमार्यर्थम्; यथा मृते यशःशेष इति, अग्राम्यत्ववपु रुदारता च स्वीकृतानीति तै रुक्तम्, तत्र वैपरीत्यस्यापि सुवचत्वात् इत्यस्य पूर्वमेवोक्तत्वात्। अथैतेषां क्रमेणोदाहरणानि –

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥ 142

अत्र सन्त इत्यस्य सदसद्व्यक्तिहेतव इत्यस्य साभिप्रायत्वं व्यक्तमेव। यावदर्थपदतेति। यथा कार्श्यास्थानं न तु कार्श्यगुणस्थानमिति। अत्र गुणपदस्याधिक्यात्। माधुर्यं यथा –

यदि दह त्यनलोऽत्र किमद्भुतं
यदि च गौरव मद्रिषु किं ततः।
लवणमम्बु सदैव महोदधेः
प्रकृतिरेव सता मविषादिता॥ 143

अत्र स्वाभाविकत्वरूप एक एवार्थः किमद्भुत मिति, किं तत इति, सदैवेति भङ्गित्रयेण कथितः। मृते यशश्शेष इति। यथा –

सा रसवत्ता विहिता नवका विलसन्ति चरति नो कङ्कः।
सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये॥ 144

वाचि वैदग्धी यथा –

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः।
लुप्तं नामापि सीतेति न च रामो न जीवति॥ 145

एवं

**"पदार्थे वाक्यरचनं वाक्यार्थे च पदाभिधा।**
**प्रौढि र्व्याससमासौ च"॥** K.S.V. III. ii. 2.

इति या प्रौढिरोज इत्युक्तं तदपि सम्यक्। प्रौढिः प्रतिपादनवैचित्र्यम्। एकवाक्यार्थस्थाने अनेकप्रतिपादनं व्यासः। अनेकवाक्यार्थस्य एकेन प्रतिपादनं समासः। क्रमेण यथा

सरसीः परिशीलितुं मया गमिकर्मीकृतनैकनीवृता ।
अतिथित्व मनायि सा दृशोः सदसत्संशयगोचरोदरी ॥ 146

अत्र दृष्ट इत्येकपदार्थे 'अतिथित्व मनायि सा दृशो' रिति ।

अस्ति ते सरसा वाणी सुधापानाय कर्णयोः ।
स्वर्लाभोऽप्ययमेवास्य तन्वि त्वं चेत्प्रसीदसि ॥ 147

इत्यत्र वा –

यन्न दुःखेन संभिन्नं न च ग्रस्त मनन्तरम् ।
अभिलाषोपनीतं हि तत्सुखं स्वःपदास्पदम् ॥ 148

इति बहु वक्तव्ये स्वःपदं कृत मित्युक्तम् । व्यासो यथा –

यदेव तनुमध्याया मध्य मालंब्य जायते ।
त न्निरालंबनं ज्ञान मसदालंबनं च तत् ॥ 149

अस्या मध्यं नास्तीति वक्तव्ये तथोक्तम् । समासो यथा –

पतिश्वशुरता ज्येष्ठे पतिर्देवरताऽनुजे ।
इतरेषु च पाञ्चाल्या स्त्रितयं त्रितयं त्रिषु ॥ 150

न चैतत् वैचित्र्यमात्रं न गुण स्तदभावेऽपि काव्यव्यवहारप्रवृत्ते रिति परोक्त-दूषणमस्तीति वाच्यम् । दत्तोत्तरत्वात्, तदभावेऽपि काव्यव्यवहारप्रवृत्तितोऽपि गुणत्वानपायाच्च । गुणान्तरादेव तत्र काव्यव्यवहारप्रवृत्ते रिति यथाऽलङ्कारेषु । एवं समताप्येकरूप्यं गुणः । यथा –

उदेति सविता ताम्र स्ताम्र एवास्तमेति च ।
संपत्तौ च विपत्तौ च महता मेकरूपता ॥ 151

ऐकरूप्यं विना सहृदयहृदयवैरस्यस्यानुभवसिद्धत्वात् । अर्थव्यक्तिरपि गुणः । अर्थस्याभिप्रेतस्य वस्तुनोऽभिव्यक्ति र्भावाभिव्यक्ति रिति यावत् । यथा –

दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा ।
आसी द्विवृत्तवदना च विमोचयन्ती
शाखासु वल्कल मसक्तमपि द्रुमाणाम् ॥ 152

यत्तु अर्थस्य वस्तुस्वभावस्य अभिव्यक्ति रित्यर्थं कल्पयित्वा स्वभावोक्त्या-

वस्यान्तर्भावो विधीयते इत्यज्ञानमात्रम्। एवं दीप्तिरसत्वरूपा कान्तिरपि गुणः, दीप्तिः स्फुटतरप्रकाशः। तथा चार्थनिष्ठं स्फुटतररसप्रकाशकत्वमेव गुण इति निर्गलितोऽर्थः। न चास्य ध्वना वन्तर्भाव इति कस्यचि द्दूषण मस्त्विति वाच्यम्। तद्विशेषत्वेऽप्युपाधिभेदेन भेदसंभवात्। वस्तुतस्तु विदग्धपरिगृहीतार्थत्वमेव कान्तिः। न चाविदग्धोक्तिप्रतिपन्नार्थकस्वरूपस्यार्थदोषस्य ग्राम्यत्वस्य त्यागा दस्य परिग्रह इति वाच्यम्। पूर्ववत् दत्तोत्तरत्वात्। यथा –

यदवधि यदुनन्दनाननेन्दुः
सहचरि लोचनगोचरो बभूव।
तदवधि मलयानिलेऽनले वा
सहजविचारपराङ्मुखं मनो मे ॥ 153

एव मर्थस्यायोने रन्यच्छायायोनेर्वा यदि न भवति दर्शनं, त त्कथं काव्य मित्यर्थदृष्टिरूपः समाधिरपि न गुण इति कस्यचि द्दूषण मलग्नकम्। अर्थपदस्य सूक्ष्मार्थपरतयाऽदोषत्वात्। सूक्ष्मः तीक्ष्णमतिसंबन्धी। सातिशयचमत्कारकारीत्यर्थः। अयोनि र्यथा –

'सद्योमुण्डितमत्तहूणचिबुकप्रस्पर्धि नारङ्गकम्'।

एवं वर्णन मन्येन न कृतमि त्ययोनिः। अन्यच्छायायोनि र्यथा –

दृष्टेऽपि किं तिष्ठति नाथनाथ
रङ्कु र्विधो रङ्क इवेति शङ्की।
तत्त्वाय तिष्ठस्व मुखे स एव
यद्वै रथे पृष्ठमपश्य दस्य ॥ 154

अत्र मुखेन चन्द्रो जित इत्यन्येनापि वर्णित इत्यन्यच्छायायोनिः ॥

॥ इति काव्यामृते गुणोज्जीवनो नाम षष्ठ उल्लासः ॥

# सप्तमोल्लासः

इदानीं वाग्विलासलक्षणां स्ताव दलङ्कारान् मार्जयामः। तत्र शब्दालङ्कारा नाह -

**यदुक्त मन्यथा वाक्य मन्यथाऽन्येन योज्यते।**
**श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्ति स्तथा द्विधा॥** K.P. IX. 78.

**यथा** --

मखे सदैव सेव्येयं भव्या सुरतरङ्गिणी।
अध्याप्येय मविद्याया स्त्वं वशी मा वशी भव॥ 155

द्वितीया यथा --

एवंव्यथोऽपि भगवान् ककुत्स्थकुलनन्दनः।
कपिराजमहाभागं न हनिष्यति मन्महे॥ 156

अत्रान्येनेति स्वोक्तो स्वय मन्यथाकरणेऽपह्नुतौ नातिव्याप्तिः। यथा --

काले पयोधराणा मपतितया नैव शक्यते स्थातुम्।
उत्कण्ठितासि तरले नहि नहि सखि पिच्छलः पन्थाः॥ 157

एवं चे दुक्तरूपा वक्रोक्तिर प्यपह्नुतावेवान्तर्भावयितुं युज्यत इति।

"**वर्णसाम्यमनुप्रास श्छेकवृत्तिगतो द्विधा**"। K.P. IX. 79.

साम्यं समानश्रुतिमत्त्वम्, छेका विदग्धाः। वृत्ति र्वैदर्भ्यादिरूपा।

"**सोऽनेकस्य सकृत्पूर्वः**"। K.P. IX. 79.

**यथा** --

पम्पासम्पातसुभगस्पन्दना श्चलचन्दनाः।
अनङ्गसङ्गरश्रान्तिचौरा श्चलन्ति मारुताः॥ 158

"**एकस्याप्यसकृ त्परः**"॥ K.P. IX. 79.

**यथा** --

भूमिभृद्धृदयभूषणीभवन्नीलनीलमणिहारहारिणि।
रामनामनि गुणैकधामनि श्यामधामनि मनोऽस्तु मामकम्॥ 159

एकस्यापीत्यपिशब्दबला दनेकस्यापि । यथा –

एष ध्वान्तपयोधिमन्थनविधौ मन्था कलाना ञ्चलः
कन्या कापि दिगम्बरस्य निहिता पन्थाश्च पान्थापदाम् ।
फुल्लेन्दीवरसान्द्रसुन्दरदृशां सन्दोहमानन्दयन्
मन्दं मन्द ममन्दकुन्दधवल श्चन्द्रो दिवि स्पन्दते ॥ 160

**"शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः" ।** K P. IX. 81.

मात्रग्रहणात् शब्दार्थयो रभेद इति सूचितः । यथा –

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ 161

**अर्थे स त्यर्थभिन्नानां वर्णानां सा पुनःश्रुतिः ।**
**यमकं पादतद्भागवृत्ति तद्या त्यनेकताम् ॥** K.P. IX. 83.

यथा –

वपुरुमाधवमाधवयोरिदं
जयति चन्द्रकि चन्द्रकिचन्द्रकि ।
विहगपुङ्गवपुङ्गववाहनं
मकरकुण्डलि कुण्डलिकुण्डलि ॥ 162

यथा वा –

न वासोऽस्ति न वासोऽस्ति न वासोऽस्मि न वाश्रये ।
इत्थं सखे सखेदोऽहं सखे जीवामि संशितः ॥ 163

यथा वा –

आयातामधुरजनी मधुरजनी गीतिहृद्येयम् ।
अङ्कुरितः स्मरविटपी स्मर विट पीनस्तनी मबलाम् ॥ 164

यथा वा –

आयातं सखि शरदा शरदार्हा मन्मथोऽत्र पान्थानाम् ।
उदगा न्निशाधिनाथो निशाधिनाऽथो हता वियोगिन्यः ॥ 165

यथा वा –

इन्दिराहृदयहर्म्यनागरे
घोषयोषिदनुरागसागरे ।
योगिचित्तकृतनित्यजागरे
खेल नीलमणिधाम्नि नागरे ॥ 166

यद्यनुप्रासत्वेनास्य सङ्ग्रहो भवितु मर्हति, तथापि चमत्कारप्रयोजकोपाधिभेदादनयो र्भेद इति मन्तव्यम् ।

**वाच्यभेदेन भिन्ना य द्युगपद्भाषणस्पृशः ।**
**श्लिष्यन्ति शब्दाः श्लेषोऽसौ (अक्षरादिभिरष्टधा) ॥** K.P. IX. 84.

श्लिष्यन्ति भिन्नं स्वरूप मपह्नुवते । तथा च शब्दयो र्भेदाग्रहः श्लेष इति । यथा –

ते कौपीनधना स्त एव हि परं धात्रीफलं भुञ्जते
तेषां द्वारि नदन्ति वाजिनिवहा स्तैरेव लब्धा क्षितिः ।
तै रेतत् समलङ्कृतं निजकुलं किं वा बहु ब्रूमहे
ये दृष्टाः परमेश्वरेण भवता तुष्टेन रुष्टेन वा ॥ 167

यथा वा –

श्रीगौडेन्द्र तवार्जितोर्जितयशस्संघातमुक्तामणी-
नादायैव विधि र्विधित्सु रनघं हारं त्वदीयै र्गुणैः ।
नीरन्ध्रा नवलोक्य ता नवहितो नान्तं गुणानामपि
प्रोज्झित्सु र्गगनान्तरे समकिर तांस्तां स्तत स्तारकाः ॥ 168

यथा वा –

कविमतिरिव बहुलोहा [1]प्रभातवेलेव घटितबहुचक्रा ।
हरमूर्तिरिव हसन्ती भाति विधूमानलोपेता ॥ 169

एषु श्लेषस्य चमत्कारता नाऽपह्नोतुं शक्यते । सा तु स्वत एव चमत्कारकारिता न तु पदार्थद्वयोपस्थित्यनन्तरं जायमाने रसोद्बोधे उपकारितया तदासदाग्रहस्य तद्ज्ञानस्य वा संभवात् । तथा चास्य कथ मलङ्कारत्वं रसानुपकारकत्वा दिति न जानीमः । तदुक्तम् –

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारा स्तेऽनुप्रासोपमादयः ॥ 170

1. सुघटितचक्रा प्रभातवेलेव । (Pt. Text.)

इति। तं रस मङ्गद्वारेण वाच्यवाचकरूपस्वव्यञ्जकातिशयजननद्वारेणेत्यर्थः।
अथ चित्रम् –

**तच्चित्रं यत्र वर्णानां पद्मा (खड्गा) द्याकृतिहेतुता॥** K.P. IX. 85.

सन्निवेशविशेषेण यत्र न्यस्ता वर्णाः खड्ग (पद्म) प्राद्याकारता मुल्लासयन्ति त च्चित्र मिति कथ्यते। यथा –

काले कामशरत्रातपातचञ्चद्विलोचना।
नाकलोका दिवायाता भूमौ जयति मेनका॥ 171

काम्या सर्वगुणोद्रिक्ता विश्वसन्तोषदायिका।
कान्तेहलोकानन्दौघश्री श्रीमासाधिकाधिका॥ 172

खड्गबन्धः। एव मन्येऽपि भेदा बोध्याः। एते शक्तिमात्रप्रदर्शकाः न काव्यस्वरूपतां दधतीति काव्यप्रकाशकाराः। केचि दनुप्रासादिव देवेति शब्दमात्र मलङ्कृत्यैव रस मुपकुर्वन्ति इति वदन्ति। न चानयो र्मतयो रेकतरपरिग्रहः साधीयान्। अनुभवकलह एव पर्यवसानात्।

**पुनरुक्तवदाभासो विभिन्नाकारशब्दगा।**
**एकार्थतेव शब्दस्य तथा शब्दार्थयो रयम्॥** K.P. IX. 86.

यथा –

चकास त्यङ्गना रामाः कौतुकानन्दहेतवः।
तस्य राज्ञः सुमनसो विबुधाः पार्श्ववर्तिनः॥ 173

विभिन्नाकारशब्दगा विजातीयानुपूर्वीकशब्दगेत्यर्थः। तेन –

कदली कदली करभः करभः करिराजकरः करिराजकरः।
भुवनत्रितयेऽपि बिभर्ति तुला मिद मूरुयुगं न चमूरुदृशः॥ 174

इत्यर्थान्तरसंक्रमितवाच्ये नातिव्याप्तिः। अत्रापि श्लेषव द्विचारणीयम्। यथा श्लेषस्य तथा पुनरुक्तवदाभासस्य चमत्कारिताऽनुभवसिद्धा; किं तु सा स्वत एव ननु पदार्थद्वयोपस्थित्यनन्तरं जायमाने रसे त मुपकृत्य, तदानीं पुनरुक्तवदाभासस्यैव संभवा दिति।

अथार्थालङ्कारान् निर्णेजयामः । तेषूपमा तावत् तद्भिन्नत्वे सति तद्गतभूयो-धर्मवत्त्वम् । यथा –

इद मह्नि कैटभजिता शयना-
दपनिन्द्रपाण्डुरसरोजरुचा ।
प्रथमप्रबुद्धनगराजसुता-
वदनेन्दुनेव तुहिनद्युतिना ॥ 175

उदाहरणानि भेदप्रभेदान्वयबोधविचारादिकरीषु काव्यपरीक्षातत्त्वबोधिनी सारबोधिनीषु बोद्धव्यानि। यत्किञ्चि दुदाह्रियते। क्यजादिप्रयोगेऽपि यथा –

अस्मिं श्चन्द्रमसि प्रसन्नमहसि व्याकोशकुन्दत्विषि
प्राचीनं ख मुपेयुषि त्वयि गते दूरं निजप्रेयसि ।
श्वासः कैरवकोरकीयति मुखं तस्याः सरोजीयति
क्षीरोदीयति मन्मथो दृगपि च द्राक् चन्द्रकान्तीयति ॥ 176

इदानीं पुन र्दुर्दुरूढाः प्रत्यवतिष्ठन्ते । यथा एकस्य बहूपमानादाने मालोपमावत् उपमेयस्योपमानत्वे रशनोपमाव दनन्वय उपमेयोपमा चोपमाविशेष एव न तयो रलङ्कारान्तरत्वम् । तथा हि –

**उपमानोपमेयत्वे एकस्यैवैकवाक्यगे ।**
**अनन्वयो ; विपर्यास उपमेयोपमा तयोः ॥** K.P. X. 91.

इति तयो र्लक्षणद्वयम् । यथा –

गगनं गगनाकारं सागरः सागरोपमः ।
रामरावणयो र्युद्धं रामरावणयो रिव ॥ 177

तथा –

कमलेव मति र्मतिरिव कमला तनुरिव विभा विभेव तनुः ।
धरणीव धृति र्धृतिरिव धरणी सततं विभाति बत यस्य ॥ 178

न चानयो स्समानान्तरसंबन्धाभाव श्चमत्कारप्रयोजकः, उपमायां तु सादृश्य-मित्युपमातो भेद इति वाच्यम् । एकस्योपमानत्वे उपमेयत्वे तथा प्रतीता-वप्यनयो रुपमात्वानपायात् । न च तद्भिन्नत्वे सतीति विशेषणा दुपमातो

तयो र्भेद इति वाच्यम्। कल्पिताकल्पितसाधारणभेदस्यैव विवक्षितत्वात्। कथ मन्यथा उपमानत्वोपमेयत्वे एकस्यैवैकवाक्यगे इत्यादि सूत्रं संगतं स्यादिति।

**संभावन मथोत्प्रेक्षा प्रकृतस्य समेन यत्।** K.P. X. 92.

संभावन मुत्कटकोटिकः संशयः "अयं चन्द्र इव भविष्यती-' त्याकारः। यथा –

स्वर्गश्च पृथ्वी च रसातलं च
लक्षत्रयं मे धनु रेकमेव।
इत्थं विचिन्त्यापरचापयुग्म-
मस्या भ्रुवौ किं निरमा दनङ्गः॥ 179

यथा वा –

त्वयि भूयिष्ठसंभारे स्वामिन् सोमं मिमासति।
संभ्रमादिव सोम स्ते यशस्तोमेषु लीयते॥ 180

अत्रेद मवधातव्यम् – इयं व्यङ्ग्योपमैव काव्यसर्वस्वभूतत्वा दलङ्कार इति वस्तु-स्थिति रुत्प्रेक्षा तु तदुत्थापिके त्यलङ्कारतया व्यवह्रियते। एवं सन्देहरूप-कादिंष्वपि बोद्धव्यम्। यथास्थानं वक्ष्यामः। न च वाच्या मुत्प्रेक्षां विहाय किमितिं व्यङ्ग्योपमाया स्ताव दलङ्कारत्वं स्वीक्रियत इति वाच्यम्। वाच्योत्प्रे-क्षाया व्यङ्ग्यप्रतीते रधिकचमत्कारजनकत्वस्य सर्वजनसिद्धत्वात्। न चोपमाया व्यङ्ग्यत्वे तदानीं तस्या नालङ्कारत्वं किन्त्वलङ्कार्यत्व मेवेतिं वाच्यम्। रसपुष्टि-द्वारा तस्यालङ्कार्यत्वेऽप्यलङ्कारत्वस्यानपायात्।

**स सन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः।** K.P. X. 92.

पूर्वसूत्रात् 'प्रकृतस्य समेन यत्' इत्यनुवर्तते। यदिति लिङ्गव्यत्यये-नान्वयः। तथा च प्रकृतस्य समेन यः संशयः स सन्देहनामाऽलङ्कारः।

यथा –

[1]द्विधाकृतात्मा किमयं दिवाकरो
विधूमरोचिः किमयं हुताशनः ॥
गतं तिरश्चीन मनूरुसारथेः
प्रसिद्ध मूर्ध्वज्वलनं हविर्भुजः ।
पत त्यधो धाम विसारि सर्वतः
किमेतदि त्याकुल मीक्षितं जनैः ॥ 181

तदनुक्तौ यथा –

नाक्षराणि पठता किमपाठि
[2]विस्मृतः किं मयवा पठितोऽपि ।
इत्थ मर्थिजनसंशयडोला-
खेलनं खलु चकार नकारः ॥ 182

इहापि व्यङ्ग्योपमैवालङ्कारः । सन्देह स्तदुत्थापक इति ।

**त द्रूपक मभेदो य उपमानोपमेययोः ।** K.P. X 93.

यथा –

द्राघीयःसहचारवासमिति तत्तेदादतावोत्कटा-
दङ्कत्यक्तकलङ्ककङ्कसहित शशाङ्के शशाङ्को बकः ।
ज्योतिर्मण्डलपुण्डरीकनिकरे पद्माकरे पुष्करे
नीराणां ग्रसमान एष बलभौ मानौघमीनोत्करान् ॥ 183

यथा वा –

कमलाक्षेपिणि संमुखमुखचन्द्रे चन्द्रिकालोभात् ।
लोचनचकोरयुगलं चकार वासं विजानीमः ॥ 184

यथा वा –

श्यामचामरचमत्कृतान्तरं राजतं फलक मिन्दुमण्डलम् ।
गूढसर्ववपुषो मनोभुवो धीर वीरविजयाय जृम्भते ॥ 185

1. Mallinātha says that Divākara in his commentary on Vṛttaratnākara has illustrated this verse with its six feet as an example of ṣaṭpada-cchandas. But the text of Śiśupālavadha gives the last four feet only.

2. प्रस्मृतः (Pt. ed.)

यथा वा —

मम खण्डयन्तु विघ्नान् भुजदण्डाः पुण्डरीकनयनस्य ।
उद्धृतदनुतनुजानां चत्वारः कालयामिनीयामाः ॥ 186

इहापि व्यङ्ग्योपमैवालङ्कारो, रूपकं तु तदुत्थापकम् ।

**प्रकृतं य न्निषिध्याऽन्य त्साध्यते सात्वपह्नुतिः ।** K.P. X. 96.

यथा —

कीर्ति स्ते नृप योगिनी स्फुटमियं सर्वत्र दिव्यापगा-
गङ्गाभोगवतीमिषात् त्रिभुवने भूत्वा त्रिधा वर्तते ।
किंच क्षीरधिकुन्दचन्द्रकुमुदप्रालेयशैलच्छलात्
कायव्यूह मिवाकरो यदिह त न्मुक्तेन जाता ध्रुवम् ॥ 187

अत्रा प्युत्प्रेक्षाऽवबोद्धव्या ।

**श्लेषः स वाक्ये एकस्मि न्यत्रानेकार्थता भवेत् ।** K.P. X. 96.

एकस्मिन् वाक्ये वाच्यैकत्वेनाभिन्नस्वरूपे अनेकार्थता शक्त्या निरूढ-लक्षणया च अयं पारिभाषिकोऽर्थः श्लेषः । श्लेषनिरूपणं तु वाच्यभेदेने त्यनेन च शब्दार्थभेदेन कृतमेव । यथा —

उदय मयते दिङ्मालिन्यं निराकुरुतेतरां
नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः ।
रचयतितरां स्वैराचारप्रवर्तनकर्तनं
बत बत लसत्तेजःपुञ्जो विभाति विभाकरः ॥ 188

विभाकरः सूर्यः, राज्याभिषेककाले पुरोहितादिभि स्तत्तुल्यत्वेन सङ्केतितो नृपति-विशेषश्च । न च तत्र शक्तिरेव, तत्कल्पने मानाभावात् । अत्र सूर्यानुकूला अर्थाः शक्या, नृपानुकूलाश्चार्था लक्ष्याः । तथा हि । उदयं पूर्वाचलं संपदं च । दिशो मालिन्य मन्धकारसंबन्धात्, दिश्यानां जनानां दारिद्र्येण कुवेशत्वं च । एव मन्यान्यपि विशेषणानि बोद्धव्यानि । अत्रापि व्यङ्ग्योपमैवालङ्कार इति बोध्यम् ।

**परोक्तिभेदकैः श्लिष्टैः समासोक्तिः ।** K.P. X. 97.

यथा –

[1]अनुरागवती सन्ध्या दिवस स्तत्पुरस्सरः ।
अहो दैवगति श्चित्रा तथापि न समागमः ॥ 189

यथा वा –

उच्छृङ्खले मुखरकोकिलशंखघोषे
दिङ्मल्लिकालिकलमङ्गलगीतकेन ।
पम्पानिलः सुरभिकोरकगर्भिणीनां
सीमन्त मुन्नयति चूतलतावधूनाम् ॥ 190

इहापि व्यङ्ग्योपमैवालङ्कार इति बोद्धव्यम् । निदर्शना –

**अभवन्वस्तुसंबन्ध उपमापरिकल्पकः ।** K.P. X. 97.

वस्तु द्विविधम्, वाक्यार्थपदार्थभेदात् । तत्राद्यं यथा –

क्व सूर्यप्रभवो वंशः क्वचाल्पविषया मतिः ।
तितीर्षु र्दुस्तरं मोहा दुडुपेनाऽस्मि सागरम् ॥ 191

अत्र उडुपेन सागरतरणमिव मन्मत्या सूर्यवंशवर्णन मित्युपमायां पर्यवस्याति । द्वितीयं यथा –

उत्फुल्लस्थलनलिनीवना दमुष्मा-
दुद्भूतः सरसिजसंभवः परागः ।
वात्याभि र्वियति विवर्तितः समन्ता-
दाधत्ते कनकमयातपत्रलक्ष्मीम् ॥ 192

अत्र कथ मन्यस्य लक्ष्मी मन्यो वहती त्युपमायां पर्यवसानम् ।

**स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव तु[2] सा परा ।** K.P. X. 98.

---

1. Kuvalayānanda gives this as an example of विशेषोक्ति. But Ānandavardhana, Sārabodhinī, Pradīpa and udyota explain this as समासोक्ति only. KP. P. 526.

2. च (KP. Pt. ed).

यथा –

उन्नतं पद मुपैति यो लघु र्हेलयैव स पते दिति ब्रुवन् ।
शैलशेखरगतो दृषत्कण श्चारुमारुतधुत: पत त्यधः ॥ 193

अत्र पततीति क्रिया । पते दिति क्रियाया: पतनस्य लाघवेन समुन्नतपदप्राप्ति-रूपस्य कारणस्य संबन्ध: ख्याप्यते । स चान्यस्यापि लघो रुन्नतपदप्राप्ति स्तद्वत् पतनायेति दृष्टान्ते पर्यवस्यति । निदर्शना दृष्टान्तीकरणम् । अत्र च सुतरां व्यङ्ग्योपमाऽलङ्कार: ।

**अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया ।** K.P. X. 98.

अस्या: बहुविषयत्वेऽपि तुल्ये प्रस्तुते तुल्यान्तरस्याभिधानेऽतीव चमत्कार इति तदे वोदाह्रियते । यथा –

महेश्वर श्शुद्धमना: प्रपन्नं त्वा मन्यसामान्य मुरीचकार ।
मैवं कुमारं भज भो भुजङ्ग भुजङ्गभुक् तत्र हि गूढ मास्ते ॥ 194

यथा वा –

भस्मनि स्मररिपो रनुरागो हीयते न घनसारपराग: ।
[1]कङ्कणीयति फणी न मणीनां काचिद प्यपचिति र्न च हेम्न: ॥ 195

यथा वा –

यास्यति जलधरसमय स्तव च समृद्धि र्लघीयसी भविता ।
तटिनि तटद्रुमपातनपातक मेकं चिरस्थायि ॥ 196

यथा वा –

आमृज्ञ मम्भोनिधि रेतु शोषं ब्रह्माण्ड माहिण्डतु चाप्तरङ्गै: ।
नास्ति क्षति र्नोपचिति: कदाचि त्वयोदवृते रिह चातकस्य ॥ 197

यथा वा –

अनिशं दहति हुताश: सततं हालाहलज्वाला ।
शिरसि रसायन मेतत् सुरधुनि शंभो स्तवैवांभ: ॥ 198

---

1. भूषणं यदि फणी न मणीनां (Subhāṣitaratnabhāṇḍāgāra).

एषु सर्वत्राप्रस्तुतस्याभिधाने प्रस्तुतस्य तुल्यरूपाक्षेपे व्यक्त मेवोपमा व्यङ्ग्येति ॥

**निगीर्याध्यवसानं तु प्रकृतस्य परेण यत्।**
**प्रस्तुतस्य य दन्यत्त्वं यद्यर्थोक्तौ च कल्पनम् ॥**
**कार्यकारणयो र्यश्च पौर्वापर्यविपर्ययः।**
**विज्ञेयाऽतिशयोक्तिः सा** ... ॥ K.P. X. 100-101.

असाधारणधर्मेणानुक्त्वा प्रस्तुतस्य वर्णनीयस्य परेणोपमाने नाध्यवसानं तदात्माध्यासः सैका। यथा –

उपप्राकाराग्रं प्रहिणु नयने तर्कय मना-
गनाकाशे कोऽयं गलितहरिणः शीतकिरणः।
सुधाबद्धग्रासै रुपवनचकोरै रनुसृतां
किरञ्ज्योत्स्ना मच्छां लवलिफलपाकप्रणयिनीम् ॥ 199

अत्रापि व्यङ्ग्योपमैवालङ्कारः। यच्च तदेवान्यत्वेन अध्यवसीयते सा परा। यथा –

अन्यदेव हि लावण्य मन्यैवास्या स्तनुद्युतिः।
[1]राज्ञा साधारणविधे र्निर्मिति र्नैव तद् भवेत् ॥ 200

अत्र व्यतिरेक एव व्यङ्ग्योऽलङ्कारः। "यद्यर्थोक्तौ च कल्पनम्" अर्थादसंभविनोऽर्थस्य, यथा –

उभौ यदि व्योम्नि पृथक् प्रवाहा-
वाकाशगङ्गापयसः पतेताम्।
[2]तदोपमीयेत तमालनील-
मामुक्तमुक्तालत मस्य वक्षः ॥ 201

अत्रासंभावितस्योपमैव चर्वणीया। चतुर्थी यथा –

हृदय मधिष्ठित मादौ मालत्याः कुसुमचापबाणेन।
चरमं रमणीवल्लभ लोचनविषयं त्वया भजता ॥ 202

---

1. तन्मन्ये रचना नैषा सामान्यस्य प्रजापतेः K Pa. P. 89.

2. तेनो (Si. Pt. ed.)

अस्य विरोध एवान्तर्भावः ।

**प्रतिवस्तूपमा तु सा ॥**
**सामान्यस्य द्वि रेकस्य यत्र वाक्यद्वये स्थितिः ।** K.P. X. 101-102.

साधारणधर्म उपमेयवाक्ये उपमानवाक्ये च कथितपदस्य दुष्टतयाऽभिहितत्वा च्छब्दभेदेन य दुपादीयते सा वस्तुनो वाक्यार्थस्योपमानत्वात् प्रतिवस्तूपमा ।

यथा –

देवीभावं गमिता परिवारपदं कथं भज त्येषा ।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम् ॥ 203

अत्र स्फुटैवोपमा व्यङ्ग्या, स एवालङ्कारः ।

**दृष्टान्तः पुन रेतेषां सर्वेषां प्रतिबिंबनम् ॥** K.P. X. 102.

एतेषां साधारणधर्मादीनां प्रतिबिम्बनं प्रतिबिम्बभावः । पूर्वसूत्रे एकस्योक्तत्वात् इह तु पुन रेतेषां सर्वेषा मित्यनेन विकल्प्य परिहारेण समुच्चयसूत्रणम् । तेन विशेष्यस्य विशेषणस्य साधारणधर्मस्य यत्रोपमेयोपमानभावो गम्यत इत्यर्थः पर्यवसन्नः । यथा –

त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम् ।
आलोके हि हिमांशो र्विकसति कुसुमं कुमुद्वत्याः ॥ 204

यथा वा –

पुत्रे महिमभूयिष्ठे पितु रेवाधिकं यशः ।
फले हि स्वादुसंपन्ने प्रशंसन्ति महीरुहम् ॥ 205

इहापि व्यङ्ग्योपमैव चमत्कारहेतुः । एवं स्मरणे भ्रान्तिमति च व्यङ्ग्योपमैवालङ्कारः । तथा हि –

**यथानुभव मर्थस्य दृष्टे तत्सदृशे स्मृतिः ।**
**स्मरणं, भ्रान्तिमा नन्यसंवि त्तत्तुल्यदर्शने ॥** K.P. X. 132.

क्रमेणोदाहरणानि –

*करजुअगहिअजसोआत्थणमुहविणिवेसिआहरपुडस्स ।
संभरिअपंचजण्णस्स णमह कण्हस्स रोमाञ्चं ॥ 206

धामधर्षि नवमैन्दवं महः प्रेक्ष्य संभ्रमवशा त्ससाध्वसः ।
वीतिहोत्र इति गेहिनीस्तना वाचकर्ष कलशीधियाऽध्वगः ॥ 207

अत्रोभयत्र दृष्टे तत्सदृश इति तत्तुल्यदर्शन इति करणात् सादृश्यज्ञानहेतुकौ स्मरणभ्रमा वेवालङ्कारा विति स्फुटैव सादृश्यप्रतीति श्चारुताहेतु रिति ।

**सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् ।**
**सैव क्रियासु वह्विषु कारकस्येति दीपकम् ॥** K.P. X. 103.

प्रकृताप्रकृतात्मना मर्था दुपमेयोपमानानां धर्मः क्रियादि रेकवारं य दुपादीयते त देकस्थस्यैव समस्तवाक्यदीपना द्दीपकम् । यथा –

*किवणाणँ धणं णाआणं फणमणी केसराइँ सीहाणं ।
कुलबालिआणँ थणआ कुत्तो छिप्पंति अमुआणं ॥ 208

इहापि व्यङ्ग्योपमैवालङ्कारः । कारकस्यापि सकृ द्वह्वीषु क्रियासु वृत्ति र्दीपकम् । यथा –

स्विद्यति कूणति वेल्लति विचलति निमिषति विलोकयति तिर्यक् ।
अन्तर्नन्दति चुम्बितु मिच्छति नवपरिणया वधू श्शयने ॥ 209

अत्रैवंविधबहुक्रियासंबन्धरूपनववधूस्वभाववर्णनमेव चमत्कारित्वं न तु कारकमात्रस्य बहुक्रियासंबन्धमात्रकथना दिति, परमुखनिरीक्षकत्वा दलङ्काराभासत्वमेव नालङ्कारत्वमिति ।

**मालादीपकमाद्यं चेद्यथोत्तरगुणावहम् ।** K.P. X. 104.

पूर्वेण पूर्वेण वस्तुना यदुत्तरोत्तर मुपक्रियते तदा मालादीपकम् । यथा –

---

*करयुगगृहीतयशोदास्तनमुखविनिवेशिताधरपुटस्य ।
संस्मृतपाञ्चजन्यस्य नमत कृष्णस्य रोमाञ्चम् ॥

*कृपणानां धनं नागानां फणमणिः केसराः सिंहानाम् ।
कुलबालिकानां स्तनाः कुतः स्पृश्यन्तेऽमृतानाम् ॥

संग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्य त्समासादितम् ।
कोदण्डेन शराः शरै ररिशिर स्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्ति रतुला कीर्त्या च लोकत्रयम् ॥ 210

अत्र निस्सपत्नभूलोकत्रयव्यापिकीर्तिलाभा न्नृपते रुत्कर्षः प्रतीयते । अत्र च उदारता वाचि वैदग्ध्यात्, तद्रूपोऽर्थगुण एव चमत्कारहेतुः । किमस्यालङ्कारत्वेन तत्रैवास्यान्तर्भाव इति । एवं तुल्ययोगितायामपि ॥

**नियतानां सकृद्धर्मः सा पुन स्तुल्ययोगिता ।** K.P. X. 104.

नियतानां प्रकृतानामेव, अप्रकृताना मेव वा । क्रमेणोदाहरणानि ।

पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपुः ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः ॥ 211

अत्र विरहानुभावत्वेन प्रकृतानां पाण्डुतादीनां सकृदावेदनक्रियासंबन्धः ।

आश्चर्या माजिचर्यां तव विबुधगणा द्रष्टु मागत्य दृष्ट्वा
त्वां रुष्टं नष्टमेतत् जग दिति जुगुपुः स्वं भया त्तत्र तत्र ।
बर्हि स्ते कोपपुञ्जे तुरगखुरपुटे मातरिश्वा प्रताप-
क्रोडे भास्वा न्यशोब्धौ विधु रसिलतिकाप्रान्तकक्षे कृतांतः ॥ 212

अत्राप्रकृतानां वह्न्यादीना मेकगोपनक्रियासंबन्धः । अत्रापि राज्ञः तद्धर्माणा-मुत्कर्षकथनमेव चमत्कारहेतु र्न त्वप्रकृतानामेव सकृद्धर्मकथनं, अन्यथा अति प्रसंग इति परमुखनिरीक्षकत्वा दलङ्काराभासत्वमेव नालङ्कारत्वम् ।

**उपमाना यदन्यस्य व्यतिरेकः स एव सः ॥** K.P. X. 105.

यथा –

अखण्डमण्डलः श्रीमान् पश्यैष पृथिवीपतिः ।
न निशाकरव ज्जातु कलावैकल्य मागतः ॥ 213

**आक्षेप उपमानस्य प्रतीप मुपमेयता ।**
**तस्यैव यदिवा कल्प्या तिरस्कारनिबन्धना ॥**

इत्युभयरूपस्य प्रतीपस्यात्रैवान्तर्भावः । यथा –

लावण्यौकसि राजनि राज त्यस्मिन् कि मिन्दुबिम्बेन ।

द्वितीयं यथा –

शृणु सखि बत वचनीयं तव वदनेनोपमीयते चन्द्रः ॥ 213

**निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया ॥** K.P. X. 106.

**वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ॥** K.P. X. 107.

वक्तुमिष्टस्य विवक्षितस्याशक्यवक्तव्यत्व मिति प्रसिद्धत्वं वा विशेषं वक्तु मिच्छया निषेधो निषेध इव यः स यथाक्रमं वक्ष्यमाणविषय उक्तविषय श्चेति द्विविधः। क्रमेणोदाहरणानि –

नानीता जनकमहीमहेन्द्रपुत्री
नोद्धृतः सपरिकरः स राक्षसेन्द्रः ।
उत्पाट्य स्वय मुपढौकिता न लङ्का
वैलक्ष्या त्कुशलकथां कथं ब्रवीमि ॥ 214

अत्र कथ मित्यनेन निषेधः कुशलकथनस्याशक्यवक्तव्यत्वं व्यनक्ति । द्वितीयो यथा –

सन्तुष्टे तिसृणां पुरामपि रिपौ कण्डूलदोर्मण्डली-
क्रीडाकृत्तपुनःप्ररूढशिरसो वीरस्य लिप्सो र्वरम् ।
याच्ञादैन्यपराञ्चि यस्य कलहायन्ते मिथ स्त्वं वृणु
त्वं वृणि त्यभितो मुखानि स दशग्रीवः कथं कथ्यताम् ॥ 215

अत्र कथ मित्यनेन निषेधो रावणस्य तद्गुणानां चातिप्रसिद्धत्वं व्यनक्ति। अयमपि द्विविधो वाचि वैदग्ध्यात्मा उदाहृतार्थगुण स्तत्रान्तर्भूतः ।

**क्रियायाः प्रतिषेधेऽपि फलव्यक्ति र्विभावना ॥** K.P. X. 107.

क्रिया कारकव्यापारः । वैयाकरणा हि क्रियाया एव हेतुतां मन्यन्ते । तद्विना फलप्रकाशनं विभावना । यथा –

अस्पृशन्नपि निकृन्तति मूलं नोद्यतोऽपि निपत त्यनुवेलम् ।
केन हन्त कवितातरुहत्यै निर्मितोऽय मविनीतकुठारः ॥ 216

प्रकृतोचितं किञ्चित्कारणं खलु स्वभाव माक्षिपतीति विरोधाभासत्व मुचितम् । एवं विशेषोक्तावपि –

**विशेषोक्ति रखण्डेषु कारणेषु फलावचः ।** K.P. X. 108.

फलावचः फलाप्रकाशनम् । यथा –

निशात्ययव्यञ्जिनि पङ्कजाना-
मामोदमेदस्विनि गन्धवाहे ।
न मुञ्चतः कैतवबद्धनिद्रा-
वन्योन्यकण्ठग्रहणं युवानौ ॥ 217

अत्र प्रकृतोचितं कारण मनुरागादिकमेव मन्तव्यम् । अनयो र्विरोध एवान्तर्भावः । न च –

"जाति श्चतुर्भि र्जात्याद्यै र्विरुद्धा स्याद् गुणः त्रिभिः ।
क्रिया द्वाभ्या मथ द्रव्यं द्रव्येणैवेति ते दश" ॥

इति विरोधस्य दशविधत्वकथनात् कथ मनयो र्विरोधेऽन्तर्भाव इति वाच्यम्; अस्माभि र्दशविधत्वस्यानङ्गीकारात् ।

**यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः ॥** K.P. X. 108.

यथासंख्यनामालङ्कारः । यथा –

शंभो स्ताण्डवडम्बरे भ्रमिभृते मौलौ च फाले गले
भ्राम्यच्चन्द्रकलाकृशानुगरलश्रीः सर्वतः पातु वः ।
नेयं यातु विशृङ्खला हरजटारण्या दितो जाह्नवी-
त्येवं स्फाटिकहाटकाश्मघटिता तुङ्गालवालावली ॥ 218

अस्याः समतात्मकेऽर्थगुणेऽन्तर्भावः समुचितः । अन्यथा यथाक्रममानुपूर्वी विरहे वैषम्यं स्यात् ।

**सामान्यं वा विशेषो वा त दन्येन समर्थ्यते ।**
**यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेणवा ॥**

अनुपपन्नतया संभाव्यमानस्यार्थस्योपपादनार्थं य दर्थान्तरस्य न्यसनं उपपादकत्वे-नोपन्यासः साधर्म्येण वैधर्म्येण वा। यथा –

प्रतिकूलता मुपगते हि विधौ
विफलत्व मेति बहुसाधनता।
अवलम्बनाय दिनभर्तु रभू-
न्न पतिष्यतः करसहस्रमपि ॥ 219

यथा वा –

चन्दनतरु भुजङ्गैः सिंहीतनयेन पीडयते चेन्दुः।
त दलं मृषाविषादैः प्रायो मलिनैः कदर्थ्यते सुजनः ॥ 220

एवं वैधर्म्येणापि भेदद्वयं बोध्यम्।

**विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः।** K.P. X. 110.

यथा –

अञ्जनाकृति रसौ निरञ्जना दारुणापि घटिता न दारुणा।
मादृशापि घटिता न मादृशा नीलशैलशिखरे हरे स्तनुः ॥ 221

यथा वा –

विपक्षवृत्ति र्न सपक्षवृत्ति र्न पक्षवृत्तिः करवालधूमः।
तथापि ते विक्रमभूमिपाल प्रतापवह्नेः प्रमितिं करोति ॥ 222

**भिन्नदेशतयाऽत्यन्तं कार्यकारणभूतयोः।**
**युगप द्धर्मयो र्यत्र ख्यातिः सा स्या दसङ्गतिः।** K.P. X. 124.

ख्यातिरवभासनम्। यथा –

*जस्सेअ वणो तस्सेअ वेअणा भणइ तं जणो अलिअं।
दंतक्खअं कवोले बहूए वेअणा सवत्तीणं ॥ 223

इत्यादिना लक्षितस्याऽसङ्गतिनाम्नोऽलङ्कारस्य विरोधेऽन्तर्भावः। एवम् –

**य द्यथा साधितं केनाप्यपरेण त दन्यथा।**
**तथैव य द्विधीयेत स व्याघात इति स्मृतः ॥** K.P. X. 138-139.

---

*यस्यैव व्रण स्तस्यैव वेदना भणति त ज्जनोऽलीकम्।
दन्तक्षतं कपोले वध्वाः वेदना सपत्नीनाम् ॥

इत्यनेन लक्षितस्य व्याघातस्य विरोध एवान्तर्भावः ।

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनी स्ताः स्तुवे वामलोचनाः ॥ 224

**स्वभावोक्ति स्तु डिम्भादेः स्वक्रियारूपवर्णनम्।** K.P. X. 111.

रूपं वर्णः संस्थानं च । यथा –

नृत्यप्रस्खलदिन्दुनिस्सृतसुधासेकैः समुज्जीविते
वैयाघ्रे पृथुघोरचर्मणि नट...टातटे गर्जति ।
उद्ग्रीवः स्फुरदुद्धतश्रुति हरित्पर्यस्तनेत्रं नभः -
प्रेङ्खत्पुच्छ मितस्ततः पुररिपो र्धवि न्वृषः पातु वः ॥ 225

**व्याजस्तुति र्मुखे निन्दा स्तुति र्वा रूढिरन्यथा ।** K.P. X. 112.

रूढिः पर्यवसानम् । यथा –

[1]अदाता पुरुष स्त्यागी धनं संत्यज्य गच्छति ।
दातारं कृपणं मन्ये मृतोऽप्यर्थं न मुञ्चति ॥ 226

**सा सहोक्तिः सहार्थस्य बला देकं द्विवाचकम्।** K.P. X. 112.

द्विवाचकं द्विप्रतियोगिकान्वयबोधकम् । यथा –

मीनः पयोधिं श्वसितानिलेन सहैव नासाकुहरे प्रविष्टम् ।
मैनाकसंघट्टनसंभवेन क्षिपन् क्षुतेन श्रिय मातनोतु ॥ 227

"सत्वन्यो युगप द्या गुणक्रिया" इति लक्षिते द्वितीयसमुच्चये एवास्यान्तर्भावः ।

**विनोक्तिः सा विनान्येन यत्रान्यः सन्न नेतरः ।** K.P. X. 113.

क्वचि दशोभनः क्वचि च्छोभनः । यथा –

शातकुम्भमयकुम्भकेतुना-
वाहिनीश कविना विना कथम ।
श्रीमुकुन्दनृपते महामते
कीर्तिनर्तनकला विजृम्भिता ॥ 228

एवं द्वितीयोऽप्यूह्यः ॥

---

1. KPa. changes the order of these lines.

**परिवृत्ति र्विनिमयो योऽर्थानां स्या त्समासमैः ॥** K.P. X. 113.

परिवृत्तिरलङ्कारः । यथा –

य इह निहितबन्धेनाविधना त्यक्तुमस्मा-
द्विनिमयमिव कुर्वन् प्राप दुर्लङ्घ्यभावम् ।
कमलमुखि स किं स्या द्विद्विषां लङ्घनीयः
स्फुटमिम मवधेहि स्वप्नवृतान्तकल्पम् ॥ 229

**प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः ।**
**तद्भाविकम् ।** उदा – K.P. X. 114.

आसी दञ्जन मत्रेति पश्यामि तव लोचने ।
भाविभूषणसंभारां साक्षात्कुर्वे तवाकृतिम् ॥ 230

**काव्यलिङ्गं हेतो र्वाक्यपदार्थता ।** K.P. X. 141.

यथा –

न नीत मुपनासिकं परिमलव्यथाशङ्कया
न हन्त विनिवेशितं विरहवह्निकुण्डे हृदि ।
दृशो र्बहिरिति श्रुतौ न निहितं प्रियप्रेषितं
करे कमल मर्पितं मृगदृशा दृशा पीयते ॥ 231

यथा –

रघुवीररामभद्रे रणरङ्गे धनुषि संदधति बाणान् ।
अरिमण्डल रविमण्डल रम्भाकुचमण्डलानि कम्पन्ते ॥ 232

यथा वा –

देशे देशे नगरनगरे चत्वरे पानगोष्ठ्या-
मुन्मत्तेव भ्रमति भवतो वल्लभा हन्त कीर्तिः ।
किं वृत्तान्तैः परगृहगतैः किं तु नाहं समर्थः
तूष्णीं स्थातुं प्रकृतिमुखरो दाक्षिणात्यस्वभावः ॥ 233

यथा वा –

पातकप्रचयव न्मम भूयः
पुण्यपुञ्जमपि नाथ लुनीहि ।

काञ्चनी भवतु लोहमयी वा
श्रृङ्खला यदि पदे न विशेषः ॥ 234

एषु दृशा पीयत इत्यत्र उक्तवाक्यार्थो हेतु द्वितीये कम्पत इत्यत्र धनुषि संदधति बाणा नित्यनेकपदार्थो हेतुः, तृतीये तूष्णींस्थित्यसामर्थ्ये प्रकृतिमुखरत्वैकपदार्थो हेतुः। तथा चतुर्थे उत्तरार्धवाक्यार्थः पुण्यपुञ्जमपीत्यादौ हेतुः। अत्रेद मवधातव्यम् ॥

**तत्सिद्धिहेता वेकस्मिन् यत्रान्य त्तत्करं भवेत्।**
**समुच्चयोऽसौ** K.P. X. 116.

इत्यनेन लक्षितः समुच्चयः ; तथा –

**समाधिः सुकरं कार्यं कारणान्तरयोगतः।** K.P. X. 125.

इति लक्षितः समाधिः ; तथा –

**यथोत्तरं चे त्पूर्वस्य पूर्वस्यार्थस्य हेतुता।**
**तदा कारणमाला स्यात्** K.P. X. 120.

इति लक्षिता कारणमाला ; एवम् 'अथ हेतो रभेदतः ; उक्ति र्हेतुमता हेतु' रित्यनेन लक्षितो काव्यहेतुः काव्यलिङ्ग एवान्तर्भूतः। एषां क्रमेण उदाहरणानि।

एष एव विषमो नवमेघः
सोऽपि वर्षतितरा मविरामम्।
तत्र चेदविरतं प्लवशब्दाः
पूर्णमद्य सुतनोः शतमब्दाः ॥ 235

मान मस्या निराकर्तुं पादयो र्मे पतिष्यतः।
उपकाराय दिष्ट्येद मुदीर्णं घनगर्जितम् ॥ 236

जितेन्द्रियत्वं विनयस्य कारणं
गुणप्रकर्षो विनया दवाप्यते।
गुणप्रकर्षेण जनोऽनुरज्यते
जनानुरागप्रभवा हि संपदः ॥ 237

अविरलकमलविकास: सकलालिमदश्च कोकिलानन्द: ।
रम्योऽयमेति सुन्दरि लोकोत्कण्ठाभर: काल: ॥ 238

**पर्यायोक्तं विना वाच्यवाचकत्वेन य द्वचः ।** K.P. X 115.

व्यङ्ग्य एवार्थ: प्रकारान्तरेण शब्देन प्रतिपाद्यते चे तदा पर्यायेण प्रकारान्तरेण कथनात् पर्यायोक्त मिति पर्यवसितोऽर्थ: । यथा –

देव त्वद्वदनाम्बुजे भगवती वाणी नरीनृत्यते
तद्दृष्टुं कमला समागतवती लोलेति बद्धा गुणै: ।
कीर्ति श्चन्द्रकरीन्द्रकुन्दकुमुदक्षीरोदनीरोपमा
त्रासा दम्बुनिधीन् विलङ्घ्य भवतो नाद्यापि विश्राम्यति ॥ 239

अत्र तव वदने वाणी सदा स्फुरति, लोलापि लक्ष्मी: त्वयि स्थिरा, अद्यापि तव कीर्ति र्वर्धते इत्येतेऽर्था व्यङ्ग्या: शब्देनोक्ता इति पर्यायेणोक्तम् । अस्य वाग्वैदग्ध्यरूपाया मुदाहरणताया मर्थगुणेऽन्तर्भाव इति ।

**उदात्तं वस्तुनः संपत् ।** K.P. X. 115.

संपत् समृद्धियोग: । यथा –

कतिपयदिवसै: क्षयं प्रयायात्
कनकगिरि: कृतवासरावसान: ।
इति मुद मुपयाति चक्रवाकी
वितरणशालिनि काकतीयरुद्रे ॥ 240

अस्यातिशयोक्तौ सामान्यालङ्कार एवान्तर्भाव: ।

**महतां चोपलक्षणम्** K.P. X. 115.

महतां रसादीनां उपलक्षण मङ्गभाव: । यथा –

सोऽयं शैल: ककुभसुरभि र्माल्यवान्नाम यस्मि-
न्नीलस्निग्ध: श्रयति शिखरं नूतन स्तोयवाह: ।
अस्मिंतस्मा द्विरम विरमाऽत: परं न क्षमोऽस्मि
प्रत्यावृत्त: पुनरपि स मे जानकीविप्रयोग: ॥ 241

अयमपि नालङ्कारतया प्रतिभाति, रसस्यैव साम्राज्या न्नाङ्गभावप्रसंगोऽपि ।

**तत्सिद्धिहेता वेकस्मिन् यत्रान्य स्तत्करं भवेत्।**
**समुच्चयोऽसौ ; सत्वन्यो युगप द्या गुणक्रिया ॥** K.P. X. 116.

तत्राद्योऽन्तर्भावित एव। द्वितीयोऽपि चमत्कारितामानातन्त्र्येण तेन रसादे रेवेह चमत्कारित्वा न्नास्यालङ्कारत्वं, पूर्ववदन्तर्भावो वा। यथा –

नयनं तव रक्तं च मलिनाश्च रणेऽरयः।
धुनोषि चासिं सहसा तनुषे च महद्यशः॥ 242

एवं गुणक्रिययोरपि बोध्यम्।

**एकं क्रमेणानेकस्मिन् पर्यायोऽन्य स्ततोऽन्यथा।** K.P. X. 117.

एकं वस्तु यत्रानेकधा निधीयते अनेक मेकस्मि न्वा। क्रमेणोदाहरणानि।

नन्वाश्रयस्थिति रियं तव कालकूट
केनोत्तरोत्तरविशिष्टपदोपदिष्टा।
प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ
कण्ठेऽधुना वससि वाचि पुनः खलानाम्॥ 243

अङ्कमङ्कपरिवर्तनोचिते तस्य निन्यतु रशून्यतामुभे।
वल्लकी च हृदयंगमस्वना मञ्जुवागपि च वामलोचना॥ 244

इहापि पूर्ववद् बोद्धव्यम्।

**अनुमानं तदुक्तं य त्साध्यसाधनयो र्वचः॥** K.P. X. 117.

साध्यत्वं साधनत्वं तु कविप्रौढोक्तिनिष्पन्न मिति बोध्यम्। यथा –

यत्रैता लहरीचलाचलदृशो व्यापारयन्ति भ्रुवं
यत्तत्रैव पतन्ति सन्तत ममी मर्मस्पृशो मार्गणाः।
तच्चक्रीकृतचाप मञ्चितशरप्रेङ्खत्करः क्रोधनो
धाव त्यग्रत एव शासनधरः सत्यं तदासां स्मरः॥ 245

**विशेषणै र्य त्साकूतै रुक्तिः परिकरस्तु सः।** K.P. X. 118.

उक्तिः परिपुष्टिः, अर्था द्विशेष्यस्य। यथा –

योऽसौ क्रीडति दुर्दिनं सुदिनय न्नन्धंतम श्चन्द्रयन्
आकारान् रथयन् वनं भवनयन् क्षेत्राणि पर्यङ्कयन्।

बाह्योपाधिपराङ्मुखाय मनसा निस्सन्धि संसीव्यते
यूनो स्साहसकौशलैकगुरवे भावाय तस्मै नमः ॥ 246

**व्याजोक्ति श्छद्मनोद्भिन्नवस्तुरूपनिगूहनम् ।** K.P. X. 118.

उद्भिन्नं प्रकाशितं किञ्चि द्वस्तु केनापि व्यपदेशेन यदपह्नूयते सा व्याजोक्तिः, न चैषा पद्धतिः प्रकृताप्रकृतयोः साम्यस्येहासंभवात् । उदा –

शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लस-
द्रोमाञ्चादिविसंष्ठुलाखिलविधिव्यासंगभङ्गाकुलः ।
हा शैत्यं तुहिनाचलस्य करयो रित्यूचिवान् सस्मितं
शैलान्तःपुरमातृमण्डलगणै र्दृष्टोऽवताद्वः शिवः ॥ 247

**किञ्चि त्पृष्ट मपृष्टं वा कथितं य त्प्रकल्पते ।**
**तादृगन्यव्यपोहाय परिसंख्येति सा स्मृता ॥** K.P. X. 119.

प्रमाणान्तरावगतमपि वस्तु शब्देन प्रतिपादितं प्रयोजनान्तराभावात् सदृश-वस्त्वन्तरव्यवच्छेदाय यत् पर्यवस्यति सा परिसंख्या । अत्र कथनं प्रश्नपूर्वकं तदन्यथा च । यथा –

किं ध्येयं विष्णुपदं किं वक्तव्यं हरे र्नाम ।
किं कार्यं मार्यचरितै रभिलषितं पूजनं विष्णोः ॥ 248

अप्रश्नपूर्वकं यथा –

कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते ।
काठिन्यं कुचयुगले तरलत्वं नयनयो र्वसति ॥ 249

इयमपि रसाद्युपरागेणैव चमत्कारिणीति पूर्ववद्बोध्यम् ।

**वस्तुतोर्जननेऽन्योन्यम् ।** K.P. X. 122

'या वस्तुनो र्गुणै र्युक्तैर् मिथो भूषणभूष्यता ।
अन्योन्यमिति तद् ज्ञेयम्' । यथा –

कण्ठस्य तस्याः स्तनबन्धुरस्य
मुक्ताकलापस्य च निस्तलस्य ।
अन्योन्यशोभाजननाद्बभूव
साधारणो भूषणभूष्यभावः ॥ 250

**उत्तरश्रुतिमात्रतः ।**
**प्रश्नस्योन्नयनं यत्र क्रियते तत्र वा सति ॥**
**असकृ द्य दसंभाव्य मुत्तरं स्या त्तदुत्तरम् ।** K.P. X. 121 – 122.

यथा –

गम्यतां मन्यतः पान्थ तत्रेह वसतिः कुतः ।
दोषाय स्या दलं येन वसतिः प्रोषितालये ॥ 251

भो गृहिणि, वासं देहीति वसतियाचकस्य कस्य चि द्वचन ममुना वाक्येनोन्नीयते । इद मनुमान एवान्तर्भूतम् । यथा – 'गम्यता मित्यादिवाक्यं भो गृहिणीत्यादिप्रश्नपूर्वकं तदन्वयव्यतिरेकानुविधायित्वात्, यत्नैवं तत्नैवं संमतवत्' इत्यनुमानसंभवात् । तत्र वा सतीति प्रश्ने सतीत्यर्थः । असंभाव्यं सातिशयचमत्कारि प्रतिवचनम् । यथा –

*का विसमा देव्वगई किं लद्धं जं जणो गुणग्गाही ।
किं सोक्खं सुकलत्तं किं दुक्खं जं खलो लोओ ॥ 252

अस्य प्रश्नपरिसंख्यायामेवान्तर्भावः ।

**कुतोऽपि लक्षितः सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाश्यते ॥**
**धर्मेण केन चि द्यत्र त त्सूक्ष्मं परिचक्षते ।** K.P. X. 122 – 123.

कुतोऽप्याकारादिङ्गिताद्वा । यथा –

वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धै:
दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे ।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या
स्मित्वा पाणौ खड्गलेखां लिलेख ॥ 253

अत्राकृति मालोक्य कयापि वितर्कितं पुरुषायितं खड्गलेखालेखनेन वैदग्ध्यादभिव्यक्ति मुपनीतम् । पुंसामेव कृपाणपाणितायोग्यत्वात् । इङ्गित मुदाहरति –

संकेतकालमनसं विटं ज्ञात्वा विदग्धया ।
ईषन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥ 254

---

*का विषमा दैवगतिः किं लब्धं यत् जनो गुणग्राही ।
किं सौख्यं सुकलत्रं किं दुःखं यत् खलो लोकः ॥

अत्र जिज्ञासितः संकेतकालः कयाचि न्निशासमयशंसिना कमलमीलनेन प्रकाशितः। अयं सूक्ष्मालङ्कारो वाचि वैदग्ध्यात्मा उदारतार्थगुण स्तत्रान्तर्भूत इति मन्तव्यम्।

**उत्तरोत्तर मुत्कर्षो भवे त्सारः परावधिः॥** K.P. X. 123.

परः पर्यन्तभागोऽवधि र्यस्य, धाराधिरोहिततया तत्रैवोत्कर्षस्य विश्रान्तेः। यथा –

भोजनभूषण मबलाकरकमलावर्तितं दुग्धम्।
कदलं तदलङ्कार स्तदलङ्कारश्च शर्करासारः॥ 255

**समं [1]समतया योगो यदि संभावितः क्वचित्॥** K.P. X. 125.

यथा –

निशा शशाङ्कं शिवया गिरीशं
श्रिया हरिं योजयतः प्रतीतः।
विधेरपि स्वारसिकः प्रयासः
परस्परं योग्यसमागमाय॥ 256

अत्रापि व्यङ्ग्योपमैव चमत्कारहेतुः॥ –

**क्वचि द्य दतिवैधर्म्या न्न श्लेषो घटना मियात्।**
**कर्तुः क्रियाफलावाप्ति र्नैवानर्थश्च य द्भवेत्॥**

**गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये।**
**क्रमेणैव विरुद्धे य त्स एष विषमो मतः॥** K.P. X. 126-127.

श्लेषो योगः। यथा –

शिरीषादपि मृद्वङ्गी क्वेय मायतलोचना।
अयं क्व च कुकूलाग्निकर्कशो मदनानलः॥ 257

द्वितीयो यथा –

सिंहिकासुतसंत्रस्तः शशः शीतांशुमाश्रितः।
जग्रसे साश्रयं तत्र त मन्यः सिंहिकासुतः॥ 258

1. यंग्यतया KP.

तृतीयो यथा –

आयुष्म न्निद माश्चर्यं दृष्ठं खड्गमुखे तव ।
पायं पाय मरे रक्तं यशः शुभ्रं वम त्यसौ ॥ 259

अस्य विरोध एवान्तर्भावात् ।

**महतो र्य न्महीयांसा वाश्रिताश्रययोः क्रमात् ।**
**आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्यधिकं तु तत् ॥** K.P. X. 128.

इदमपि द्विविध मधिकं विरोध एवान्तर्भूतम् । यथा –

अहो विशालं भूपाल भुवनत्रितयोदरम् ।
माति मातु मशक्योऽपि यशोराशि र्यदत्र ते ॥ 260

द्वितीयं यथा –

युगान्तकालप्रतिसंहृतात्मनो
जगन्ति यस्यां सविकासमासत ।
तनौ ममु स्तत्र न कैटभद्विष-
स्तपोधनाभ्यागमसंभवा मुदः ॥ 261

**प्रतिपक्ष मशक्तेन प्रतिकर्तुं तिरस्क्रिया ।**
**या तदीयस्य त त्स्तुत्यै प्रत्यनीकं तदुच्यते ॥** K.P. X. 129.

तत्स्तुत्यै प्रतिपक्षमुत्कर्षयितुं तदाश्रितस्य तिरस्करणं प्रत्यनीकनामालङ्कारः । यथा –

यस्य किञ्चि दपकर्तु मक्षमः कायनिग्रहगृहीतविग्रहः ।
कान्तवक्त्रसदृशाकृतिं कृती राहु रिन्दु मधुनापि बाधते ॥ 262

इन्दो रत्र तदीयता संबन्धिसंबन्धात् । अत्र श्रीकृष्णमाहात्म्यवर्णनेनैव चमत्कारः । तथा च तन्मुखनिरीक्षकतयास्यालङ्काराभासतैव ।

**[1]विधीयते य द्वलव त्सजातीयोपलम्भनैः ।**
**तिरस्करण मन्यस्य तन्मीलित मिति स्मृतम् ॥**

---

1. समेन लक्ष्मणा वस्तु वस्तुना य न्निगूह्यते ।
निजेनागन्तुनावापि त न्मीलित मिति स्मृतम् ॥ K.P.

तथा च बलवत्सजातीयग्रहणकृता ग्रहणात्मा अभिभव एव मीलनमिति बोध्यम्। यथा –

> मल्लिकामालभारिण्यः सर्वाङ्गीणार्द्रचन्दनाः।
> क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नाया मभिसारिकाः॥ 263

अत्र ज्योत्स्नाया माधिक्यमेव चारुताहेतुरिति व्यतिरेक एवालङ्कारोऽथवाऽतिशयोक्ति रिति मन्तव्यम्।

> **स्थाप्यतेऽपोह्यते वापि यथा पूर्वं परं परम्।**
> **विशेषणतया यत्र वस्तु सैकावली द्विधा॥** K.P. X. 131.

पूर्वं पूर्वं प्रति यत्रोत्तरस्य वस्तुनो वीप्सया विशेषणभावेन स्थापनं निषेधो वा सैकावली। क्रमेणोदाहरणानि –

> पुराणि यस्यां सवराङ्गनानि
> वराङ्गना रूपपरिष्कृताङ्गयः।
> रूपं समुन्मीलितसद्विलास-
> मस्त्रं विलासाः कुसुमायुधस्य॥ 264

> न तज्जलं यन्न सुचारुपङ्कजं
> न पङ्कजं तद्यदलीनषट्पदम्।
> न षट्पदोऽसौ [1]न चुकूज यः कलं
> न गुञ्जितं तन्न जहार यन्मनः॥ 265

कस्याश्चि न्नगर्याः शरद श्चोत्कर्षवर्णन मुपजीव्य चमत्कारितेति परमुखनिरीक्षकतयास्यालङ्काराभासतैव॥

> **विना प्रसिद्ध माधार माधेयस्य व्यवस्थितिः।**
> **एकात्मा युगपद्वृत्ति रेकस्यानेकगोचरा॥**
> **अन्य त्प्रकुर्वतः कार्य मशक्यस्यान्यवस्तुनः।**
> **तथैव करणं चेति विशेष स्त्रिविधः स्मृतः॥** K P. X. 135-136

क्रमेणोदाहरणानि –

> दिवम प्युपयातानां माकल्प मनल्पगुणगणा येषाम्।
> रमयन्ति जगन्ति गिरः कथमिव कवयो न ते वन्द्याः॥ 266

---

1. न जुगुञ्ज यः कलम्। (Pt. ed).

अयं विरोध एवान्तर्भूतः । द्वितीयस्तु पर्याय एव अन्तर्भूतः । तृतीयोऽप्ये-कस्य सामग्र्या अन्यकरणा द्विरोध एवान्तर्भूतोऽतिशयोक्तौ चातिरिक्त एव वा। यथा –

स्फुरदद्भुतरूप मुत्प्रताप-
ज्वलनं त्वां सृजताऽनवद्यविद्यम् ।
विधिना ससृजे नवो मनोभू-
र्भुवि सत्यं सविता बृहस्पतिश्च ॥ 267

**स्व मुत्सृज्य गुणं योगा दत्युज्ज्वलगुणस्य यत् ।**
**वस्तु तद्गुणता मेति भण्यते स तु तद्गुणः ॥** K.P. X. 137.

तथा –

कल्याणि पाणिपतितानि विना विचार-
मेतानि मोक्तुमुचितानि न मौक्तिकानि ।
गुञ्जेति सञ्जनयते यदिह भ्रमं ते
हस्तारविन्दनयनोत्पलयोः प्रभैव ॥ 268

**तद्रूपाननुहारश्चे दस्य त त्स्या दतद्गुणः ।** K.P. X. 138.

तस्याप्रकृतस्य रूपस्याननुहारोऽग्रहणम् । यथा –

गाङ्ग मम्बु सित मम्बु यामुनं
कज्जलाभ मुभयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता
चीयते न च न चापचीयते ॥ 269

**सेष्टा संसृष्टि रेतेषां [1]भेदेनैकत्र या स्थितिः ॥** K.P. X. 139.

एतेषा मलङ्काराणां भेदेन अन्योन्यनिरपेक्षतया एकत्र शब्दभाग एव अर्थ-भाग एव उभयत्र वा यद्व्यवस्थापनं सा संसृष्टिः । यथा –

द्विरददन्तवलक्ष मलक्ष्यत
स्फुरितभृङ्गमृगच्छवि केतकम् ।
घनघनौघविघट्टनया दिवः
कृशशिखं शशिखण्डमिव च्युतम् ॥ 270

1. भेदेन यदिह स्थितिः (Pt. ed.)

अत्र यमकानुप्रासौ शब्दालङ्कारौ रूपकोत्प्रेक्षे च शब्दार्थालङ्कारसंसृष्टि प्रयोजयतः । अर्थालङ्कारसंसृष्टि यथा –

मृणालीषु मृणाली स्या दस्या दोर्वल्लिसन्निधौ ।
नालकं वदनं चास्या नालीकमिति भावितम् ॥ 271

अत्र व्यतिरेको रूपकं च संसृष्टि प्रयोजयति ।

**अविश्रान्तिजुषा मात्म न्यङ्गाङ्गित्वं तु सङ्करः ।** K.P. X. 140.

आत्मनि आत्ममात्रे इतरविजातीयासहकारेण, चमत्कारकारित्वं विश्रान्तिः । यथा –

हृतसार मिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा ।
कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिम ॥ 272

अत्रोत्प्रेक्षाया मुत्तरार्धत्रावयार्थो हेतुः ।

**एकस्य च ग्रहे न्यायदोषाभावा दनिश्चयः ॥** K.P. X. 140.

एकस्य एकतरस्येत्यर्थः । यथा –

[1]श्रीकर्णे मृगयां गतेऽपि धनुषा संयोजिते मार्गणे
ऽप्याकर्णान्तगतेऽपि मुष्टिगलिते ऽपेणाङ्गलग्नेऽपि च ।
न त्रस्तं न पलायितं न चकितं नो वा प्लुतं न द्रुतं
मृग्या मद्रशगं करोति दयितं कामोऽय मित्याशया ॥ 273

अत्र श्रीकर्णः काम एवाय मित्यस्य भङ्ग्यन्तरेण कथनात् पर्यायोक्तम् । किं च सत्यामपि विशेषदर्शनपरम्परायां भ्रम इति विरोधः । किं च विशेषादर्शन-कारणं विना भ्रम इति विभावना । किं वा विशेषदर्शने कारणे सत्यपि भ्रमाभावकथनमिति संशयात् संशयनामालङ्कारः ।

---

[1]श्रीभोजे मृगयां गतेऽपि महसा चापे समारोपिते
ऽप्याकर्णान्तगतेऽपि मुष्टिगलिते बाणेऽङ्गलग्नेऽपि च ।
स्थानान्नैव पलायितं न चलितं नोत्कम्पितं नोत्प्लुतं
मृग्या, मद्रशगं करोति दयितं कामोऽय मित्याशया ॥

भोजप्रबन्धः 81 - 217.

**स्फुट मेकत्र विषये शब्दार्थालङ्कृतिद्वयम् ।**
**व्यवस्थितं च, तेनासौ त्रिरूपः परिकीर्तितः ॥** K.P. X. 141.

यथा –

विललास जलाशयोदरे क्वचन द्यौ रनुबिम्बितेव या ।
परिखाकपटस्फुटस्फुरत्प्रतिबिम्बानवलम्बिताम्बुनि ॥ 274

[1]अत्रोभयार्धे अनुप्रासापह्नुती व्यवस्थिते इति त्रिप्रकारः । किंचालङ्कार-प्राधान्यं विनापि रीतिरसादीनां प्राधान्यादेव चमत्कारः । यथा –

परिपाण्डुरमेव गण्डयुग्मं
सहतेप्यद्य वपु र्न भूषणं च ।
पुन रापतितैव किंवदन्ती
सुतनोः प्राणपतिः प्रवत्स्यतीति ॥ 275

रसादिप्राधान्या यथा –

उत्कण्ठोन्नतकण्ठकन्दलवतां लोलाधराणां मनाक्
त्वं तिष्ठेति परस्परं विवदता मुत्सर्पता मेकदा ।
पद्मानामपि कामगद्गदगिरां शंभो र्मुखाम्भेरुहां
पार्वत्या मुखबिम्बचुम्बनविधौ जीया दहम्पूर्विका ॥ 276

यथा वा –

अक्षेऽस्मिन् मदिराक्षि चुम्बन मयोत्तुङ्गस्तनालिङ्गनं
वृत्तं संप्रति कः पुनः पण इति प्राणेश्वरे पृच्छति ।
उन्मीलत्पुलकाङ्कुरं स्मितसुधासंपर्कधौताधरं
खिन्नेनार्द्रकरेण कूणितदृशा प्रारम्भि खेलारसः ॥ 277

यथा वा –

तस्याः कञ्चुलिकापसारणवलद्व्रीडाभरायाः पुनः
प्रोद्यत्कुचकाञ्चनाचलरुचा संपादितं कञ्चुकम् ।
व्यामोहा न्मयि हर्तु मिच्छति कृतं साकूत मन्तःस्मितम्
तत्रासी दसमान मुद्ध मनयो स्तद् भैक्ष्य मक्ष्णो रभूत् ॥ 278

1. अत्रोत्तरार्धे – (क)

वस्तुतस्तु सर्वत्रैवंविषयेऽतिशयोक्तिरेव प्रमाणत्वेनावतिष्ठत इति श्रीमम्मटभट्ट-चरणैरेवोक्तं, तथा च सर्वत्र स एवालङ्कारोऽनया विना, तथा वक्रोक्तिः काव्यजीवित मिति अतिशयोक्ति रिति काव्यप्रकाशोक्तिः तथा –

दम्भो भोगिद्विपानां धुरि वहनविधौ कृच्छपानेकपानां
कुण्ठत्वं छद्मवाह्ये कमठभुजगयो रित्थ मन्योन्य मुच्चैः ।
रिङ्गद्भोजेन्द्रपादाहतिदलितमहीदुर्वहीभूतभार-
श्राम्यत्कूर्माधिराजोरगतिलकहरिन्नागवृन्दे विवादः ॥ 279

नागेन्द्रो नागयूथं नगनिवह इति क्ष्माधुराया मनेके
वाह्याः सन्तीति निद्रा मभजत कमठग्रामणीः प्राक् सुखेन ।
भोजेन्द्र चाऽद्य जन्ये विहरति विदलत्पृष्ठकूटं विनिर्यद्-
ग्रीवाकाण्डं समन्ता दतिविततकटाहांत मुर्वीं विभर्ति ॥ 280

जम्भद्विट्कुंभिकुंभस्थलबहलगलत्स्थूलमुक्ताः समन्ताद्-
व्याकीर्णाः सन्ति लाजाः प्रसृमरयशसो येन यात्राप्रसङ्गे ।
निस्त्रिंशः सोऽय मस्मद्भटभुजगसखः शैलसारः प्रमाथी
लज्जामज्जानमङ्गीकुरुत इव शिशोः त्वादृशोज्जासनेन ॥ 281

यथा वा –

वप्राघातविनोदिदन्तमुसलच्छिद्रा त्सुमेरो स्तटात्
पत्युः कुण्डलिनां फणामणिमहःस्तोमे समुन्मीलति ।
रत्नस्तम्भ इति भ्रमेण करटं कण्डूयितुं काङ्क्षतो
हेरम्बस्य जयन्ति कूणितदृशो मूर्च्छा मुधाधूतयः ॥ 282

चक्र ब्रूहि विभो गदे वद हरे कम्बो किं माज्ञाप्यतां
भो भो नन्दक जीव पन्नगरिपो किं देव कार्यं मया ।
को दैत्यः कतमो हिरण्यकशिपुः सत्यं भवद्भयः शपे
केनास्त्रेण नखै रिति प्रवदतः शौरे गिरः पान्तु वः ॥ 283

येनामण्डि कणादगौतममतं सांख्यं च संक्षोभितं
मीमांसा चुलुकीकृतैव सकलं पीतं च पातञ्जलम् ।
वेदान्तैकविचारपारगमते ब्रह्मैकलब्धस्थिते:
श्रीवत्सस्य कृति: सुधापरिणतिं स्तस्येय मुन्मीलतु ॥

**इति श्रीमन्महोपाध्याय श्रीमद्विष्णुधराचार्यसुत**

**श्रीवत्सलाञ्छनभट्टाचार्यकृतः**

**काव्यामृतनामा ग्रन्थः**

**संपूर्णः**

# श्लोकानामनुक्रमणी


| | श्लोक: | | (पृ = पृष्ठ:) |
|---|---|---|---|
| अकुण्ठोत्कण्ठया पूर्ण | 70 | .... | का.प्र. 327 पृ. |
| अखण्डमण्डल: श्रीमान् | 213 | .... | का.प्र. 650 पृ. |
| अगृह्य दहाय | 22 | | |
| अङ्क मङ्कपरिवर्तनोचिते | 244 | | रघु: 19-13 |
| अक्षेऽस्मिन् मदिराक्षि | 277 | .... | |
| अञ्जनाकृतिरसौ | 221 | .... | |
| अतन्द्रचन्द्राभरणा | 34 | | का.प्र. 146 पृ. |
| अतिपृथुलं जलकुम्भं | 9 | .... | |
| अतिविततगगन | 90 | | का.प्र. 379 पृ. |
| अदाता पुरुषस्त्यागी | 226 | | |
| अदृष्टे दर्शनोत्कण्ठा | 47. | .... | का.प्र. 268 पृ. |
| अदोषं गुणवत्काव्यं | 2 | | स. क-भ. 2 पृ. |
| अधिकरतलतल्पं | 78 | .... | का.प्र. 342 पृ. |
| अभ्यास्ते त्वत्किरीटं | 44 | | |
| अनङ्गमङ्गल | 53 | | का.प्र. 267 पृ. |
| अनिशं दहति हुताश: | 198 | | |
| अनुरागवती सन्ध्या | 189 | | ध्व.आ. 37 पृ. |
| अनौचित्यादृते नान्यत् | 120 | | ध्व.आ. 145 पृ. |
| अन्यदेव हि लावण्यम् | 200 | .... | |
| अपारे काव्यसंसारे | 1 | .... | ध्व.आ. 222 पृ. |
| अमन्दसुन्दरीगणै: | 122 | .... | |

| | | | |
|---|---|---|---|
| अयं स रशनोत्कर्षी | 43 | | म.भा. 24-19 (स्त्री) |
| अरे रामाहस्ताभरण | 99 | .... | का.प्र. 404 पृ. |
| अथित्वे प्रकटीकृतेऽपि | 106 | | म.वी.च. 2-9 |
| अलसवलितैः | 54 | | अ.श. 5 |
| अलसशिरोमणि धुत्ताणं | 32 | .... | का.प्र. 135 पृ. |
| अलिरिव नलिनान्त | 121 | .... | |
| अवन्ध्य कोपस्य | 69 | | किरा० 1-33 |
| अविदितसुखदुःखं | 71 | .... | |
| अविरतशम्भुस्तवना | 20 | .... | |
| अविरलकमलविलासः | 238 | | रु.का.अ. 92 पृ. |
| अस्ति ते मरसा वार्णा | 147 | .... | |
| अस्पृशन्नपि निकृन्तति | 216 | .... | |
| अस्य द्रोर्मूलकूल | 123 | | अ.रा. 5-50 |
| अस्मिंश्चन्द्रमसि प्रसन्न | 176 | .... | |
| अहो विशालं भूपाल | 260 | | का० 22 पृ. |
| आज्ञा शक्रशिखामणि | 96 | | बा.रा. 1-36 |
| आमूल मम्भोनिधि रेतु | 197 | .... | |
| आयातं सखि शरदा | 165 | .... | |
| आयाता मथुरजना | 164 | .... | |
| आयुष्मन्निद माश्चर्यं | 259 | .... | |
| आलिङ्गित स्तत्र भवान् | पृ. 29 | .... | का.प्र. 280 पृ. |
| आलोक्य कोमल कपोल | 112 | .... | का.प्र. 436 पृ. |
| आश्चर्य माजिचर्या | 212 | .... | |
| आश्लेषचुम्बनरतोत्सव | 136 | | अ.रा. 7-115 |
| आसादञ्जन मर्त्राति | 230 | .... | |

| | | | |
|---|---|---|---|
| इदमहि कैटभजिता | 175 | .... | |
| इन्दिराहृदयहर्म्ये | 166 | .... | |
| उच्चै रुच्चै स्तरोच्चै | 138 | .... | |
| उच्छृङ्खलं मुखरकोकिल | 190 | .... | |
| उत्कण्ठोन्नतकण्ठ | 276 | .... | |
| उत्फुल्लस्थलनलिनी | 192 | .... | |
| उत्फुल्ल कमलकेसर | 60 | | ना० 1-13 |
| उदय मयते दिङ्मालिन्यं | 188 | .... | का.प्र. 610 पृ. |
| उदेति सविता ताम्र | 151 | .... | का.प्र. 368 पृ. |
| उन्नतं पद मुपैति | 193 | .... | का.प्र. 617 पृ. |
| उपकुर्वन्ति तं सन्तं | 170 | .... | |
| उपकृतं बहु तत्र | 10 | .... | का.प्र. 83 पृ. |
| उपप्राकाराग्रं प्रहिणु | 199 | | वि.सा.भ. 1-31 |
| उभौ यदि व्योम्नि | 201 | | शि.व. 3-8 |
| उर्व्यसावत्र तर्वाली | 75 | .... | का.प्र. 334 पृ. |
| एकत्रासनसंस्थिते | 140 | | अ.श. 18 |
| एकस्मिन् शयने परा | 12 | | अ.श. 21 |
| एवं व्यथोऽपि भगवान् | 156 | .... | |
| एष एव विपर्यो | 235 | .... | |
| एष ध्वान्तपयोधि | 160 | .... | |
| औत्सुक्येन कृतत्वरा | 116 | | रत्ना० 1-2 |
| कः कः कुत्र न घुर्घुरा | 79 | .... | का.प्र. 343 पृ. |
| कश्चित् स्मितेन | 25 | .... | |
| कण्ठस्य तस्याः स्तन | 250 | | कु.सं. 1-42 |

| | | | |
|---|---|---|---|
| कतिपयदिवसैः क्षयं | 240 | .... | |
| कदली कदली करभः | 174 | | प्र.ग. 1–37 |
| कमलाक्षेपिणि संमुख | 184 | .... | |
| कमलेव मति मतिरिव | 178 | .... | का.प्र. 584 पृ. |
| करजु अगहि | 206 | .... | का.प्र. 733 पृ. |
| कल्याणि पाणिपतितानि | 268 | .... | |
| कल्लोलवेल्लित | 105 | | भ.श. 62 |
| कविमति रिव बहु | 169 | | भो.प्र. 301 |
| काम्या सर्वगुणोद्रिक्ता | 172 | .... | |
| कान्ते कामशरव्रात | 171 | .... | |
| कान्ते पयोधरगणां | 157 | .... | |
| का विसमा देव्व गई | 252 | .... | |
| किं ध्येयं विष्णु | 248 | .... | |
| किं मिति न पश्यसि | 85 | | रु.का.अ. 71 पृ. |
| किवणाणँ धणं | 208 | .... | का.प्र. 640 पृ. |
| कीर्ति स्ते नुपयोगिनी | 187 | .... | |
| कैलासः प्राक् शरीरं | 21 | .... | |
| कौटिल्यं कचनिचये | 249 | .... | रु.का.अ. 92 पृ. |
| क्रेङ्कारः स्मरकार्मुकस्य | 81 | .... | का.प्र. 344 पृ. |
| क्व सूर्यप्रभवो | 191 | | रघु० 1–2 |
| क्व कार्यं शशलक्ष्मणः | 30 | .... | |
| खणपाहुणिआ देअर | 40 | .... | ध्व.आ. 224 पृ. |
| खिद्यति कूणति वेल्लति | 209 | .... | का.प्र. 641 पृ. |
| गगनं गगनाकारं | 177 | .... | |
| गच्छति पुरः शरीरं | 3 | | शा० 1–31 |
| गच्छाम्यच्युत दर्शनेन | 46 | .... | का.प्र. 208 पृ. |

| | | | |
|---|---|---|---|
| गम्यता मन्यत: पान्थ | 251 | .... | |
| गाङ्ग मम्बु सित मम्बु | 269 | .... | का.प्र. 748 पृ. |
| गृहीतं येनासी: | 102 | | वे.सं. 3–19 |
| ग्रामतरूणं तरुण्या | 52 | .... | रु.का.अ. 83 पृ. |
| चकास त्यङ्गना रामा: | 173 | .... | का.प्र. 536 पृ. |
| चक्र ब्रूहि विभो गदे | 283 | .... | |
| चञ्चद्भुजभ्रमित | 127 | | वे.सं 1–21 |
| चन्दन तरुभिर्भुजङ्गै: | 220 | .... | |
| चरणनिपतित: पति | 132 | .... | |
| चित्तं महा नेप नत्राव | 16 | .... | का.प्र. 110 पृ. |
| चिरकाल परिप्राप्त | 66 | .... | का.प्र. 293 पृ. |
| छिन्ने ब्रह्मशिरो यदि | 19 | | धांई .... |
| जगति जयिन स्ते ते | 92 | | मा.मा. 1–36 |
| जङ्घाकाण्डोरुनालो | 83 | .... | व्य.वि. 105 पृ. |
| जम्भद्विट् कुम्भिकुम्भ | 281 | | |
| जम्सेऊ वर्णातस्से | 223 | | |
| जितेन्द्रियत्वं विनयस्य | 237 | | का.प्र. 430 पृ. |
| तं वीक्ष्य वेपथुमती | 29 | | कु.सं. 5-85 |
| तं सन्त: श्रोतुमर्हन्ति | 142 | | रघु० 1–10 |
| तद्विदभग्र्यं | 45 | | रु.का.अ. 96 पृ. |
| तपस्विभि र्या | 61 | | व्य.वि. 49 पृ. |
| त मनुगतवती शठं मदर्थे | 35 | | |
| तस्यां रघो: सूनु | 27 | | रघु० 6–68 |
| तस्या: कञ्चुलिकाप | 278 | .... | |
| ता मनङ्गजयमङ्गल | 111 | .... | का.प्र. 435 पृ. |

| | | | |
|---|---|---|---|
| तीर्थान्तरेषु स्नानेन | 59 | .... | का.प्र. 272 पृ. |
| तीर्थे तोयव्यतिकरभवे | 17 | | रघु० 8-95 |
| ते कौपीनधना | 167 | .... | |
| त्यजत मान मलं बत | 119 | | रघु० 9-47 |
| त्व मग्रत: सञ्चर | 117 | .... | |
| त्वयि दृष्ट एव तस्या | 204 | .... | का.प्र. 637 पृ. |
| त्वयि निबद्धरते: | 76 | | विक्र० 4-29 |
| त्वयि भूयिष्ठसंभारे | 180 | .... | |
| त्वय्यर्धासनभाजि | 118 | | अ.रा. 1-29 |
| त्वा मस्मि वच्मि विदुषां | 11 | .... | का.प्र. 83 पृ. |
| दम्भो भोगद्विपानां | 279 | .... | |
| दर्भाङ्कुरेण चरण: | 141, 152 | | शा० 2-12 |
| दिव मप्युपयातानां | 266 | .... | र.का.आ. 96 |
| दिशि दिशि परिहास | 131 | .... | |
| दूरा दुत्सुक मागते | 114 | | अ.श. 44 |
| दृशा दग्धं मनसिजं | 224 | | वि.सा.भ. 1-2 |
| दृष्टेऽपि किं तिष्ठति | 154 | .... | |
| देव त्वद्वदनाम्बुजे | 239 | | |
| देवीभावं गमिता | 203 | .... | वा.सू. 128 पृ. |
| देव्या शून्यस्य जगतो | 134, 145 | | उ.रा. 3-34 |
| देशे देशे नगरे नगरे | 233 | .... | |
| द्वयं गतं संप्रति | 7 | | कु.सं. 5-71 |
| द्विधा कृतात्मा किमयं | 181 | | शि.व. 1-2 |
| द्राघीय: सहचार | 183 | .... | |
| द्विरददन्तवलक्ष | 270 | .... | |
| धन्या केयं स्थिता ते | 139 | | मुद्रा० 1-1 |

| | | | |
|---|---|---|---|
| धम्मिल्लस्य न कस्य | 65 | | का.प्र. 303 पृ. |
| धामधर्षि नव मैन्दवं | 207 | .... | |
| धीरो विनीतो निपुणो | 72 | .... | का.आ. 330 पृ. |
| न खलु न खलु बाण: | 18 | | शा० 1–10 |
| न तज्जलं यन्न सुचारु | 265 | | भट्टि० 2–19 |
| न नीत मुपनासिकं | 231 | .... | |
| न न्वाश्रयस्थितिरयं | 243 | | भ.श. 4 |
| न मन्नृपतिमण्डली | 128 | | अ.रा. 1–23 |
| नयनं तव रक्तं च | 242 | .... | |
| न वासोऽस्ति न वासो | 163 | .... | |
| न स्पन्दते चन्दन | 137 | .... | |
| नाक्षराणि पठता किं | 182 | | नै० 5-121 |
| नागेन्द्रो नागयूथं | 280 | .... | |
| नाथे निशाया नियते | 88 | .... | व्य.वि. 59 पृ. |
| नानीता जनकमही | 214 | .... | |
| निशात्ययव्यञ्जितं | 217 | .... | |
| निशा शशाङ्कं शिवया | 256 | | नै० 3–48 |
| नृत्यप्रस्खलदिन्दु | 225 | ... | |
| न्यक्कारो ह्ययमेव | 63 | | हनु० 14–6 |
| पतिं श्वनिपातिः सुत | 130 | ... | |
| पतिं श्वशुरता ज्येष्ठे | 150 | | म.भा. (?) |
| पम्पासम्पात | 158 | ... | |
| परापवादनिरतै | 86 | ... | का.प्र. 363 पृ. |
| परिणतफलशङ्कि | 126 | ... | |
| परिपाण्डुर मेव गण्ड | 275 | ... | |

| | | | |
|---|---|---|---|
| पाण्डुक्षामं वदनं | 211 | ... | छ्व.आ. (लो) 166 पृ. |
| पातकप्रचयव न्मम | 234 | ... | |
| पुत्रे महिमभूयिष्ठे | 205 | ... | |
| पुराणि यस्यां सवराङ्ग | 264 | | नव० 1-22 |
| प्रजा इवाङ्गा दरविन्द | 57 | ... | |
| प्रतिकूलता मुपगते | 219 | | शि.व. 9-6 |
| प्रातः पुनः स्या दुदयश्च | 115 | | |
| प्राप्ताः श्रियः | 101 | | वै.श. 68 |
| प्रियेण संश्रय्य | 84 | | किरा० 8-37 |
| प्रेमार्द्राः प्रणयस्पृशः | 56 | | मा.मा. 5-7 |
| प्रेयान् सोऽय मपाकृतः | 38 | | वा.सू. 95 पृ. |
| बहव स्ते गुणा राजन् | 36 | | |
| ब्राह्मणातिक्रमत्यागो | 50 | | म.वी.च. 2-10 |
| भद्रात्मनो दुरधिरोह | 6 | | कप्प० 1-38 |
| भन धम्मिअ वीसद्धो | 8 | | गा.स. 2-75 |
| भस्मनि स्मर रिपो | 195 | .... | |
| भूपालरत्न | 93 | .... | का.आ. 684 पृ. |
| भूमिभृद्धृदयभूषणा | 159 | | |
| भोजनं भूषणं मथला | 255 | .... | |
| मध्नामि कौरवशतं | 51 | | वे.स. 2-15 |
| मम खण्डयन्तु विभ्रान् | 186 | | |
| मल्लिकामालभारिण्यः | 263 | | |
| मसृणचरणपातं | 82 | | वा.रा. 6-36 |
| महाप्रलयमारुत | 87 | | वे.सं 3-4 |

| | | | |
|---|---|---|---|
| महिलासहस्सभरिए | 33 | | गा.स. 2-82 |
| महेश्वरः शुद्धमनाः | 194 | .... | |
| मातङ्गा किमु वल्गितैः | 80, 133 | .... | प्रवरसेनस्य |
| मान मस्या निराकर्तुं | 236 | | का॰ 2-297 |
| मा पुन स्त मभि | 129 | | शि.व. 10-21 |
| मौनः पयोधि | 227 | .... | |
| मुनि रय मथ वीर | 14 | | म.वी.च. 2-27 |
| मृणालीषु मृणाली | 271 | .... | |
| य इह निहितबन्धे | 229 | .... | |
| यत्रानुल्लिखिता | 103 | | व.जी. 18 पृ. |
| यत्रैता लहरी | 245 | .... | का.प्र. 697 पृ. |
| यथायं दारुणाचारः | 58 | .... | का.प्र. 270 पृ. |
| यदवधि यदुनन्दना | 153 | .... | |
| यदि दहत्यनलो | 143 | | सु.र. (नी.श.) |
| यदि हरिस्मरणे सरसं | 125 | | गी.गो. 1-3 |
| यदेव तनुमध्याया | 149 | .... | |
| यन्न दुःखेन संभिन्नं | 148 | .... | |
| यस्य किंचि दपकर्तु | 262 | | शि.व. 14-78 |
| यान्त्या मुहु र्वलित | 4 | | मा.म. 1-29 |
| या मया पुरतः | 26 | .... | |
| यास्यति जलधरसमय | 196 | .... | |
| युगान्तकालप्रति | 261 | | शि.व. 1-23 |
| योऽसौ क्रीडति दुर्दिनं | 246 | .... | |
| रइ केलिहि अणिअसण | 37 | | गा.स. 5-55 |
| रक्ताशोकतरु प्रफुल्ल | 13 | .... | |
| रघुवीर रामभद्रे | 232 | .... | |

| | | | |
|---|---|---|---|
| रहः सखीभिः शपथैः | 135 | .... | |
| राकाविभावरीकान्त | 67 | .... | का.प्र. 282 पृ. |
| राजन् विभान्ति भवत | 73 | .... | का.प्र. 332 पृ. |
| राममन्मथशरेण ताडिता | 89 | | रघु० 11-20 |
| रामोऽसौ भुवनेषु | 39 | .... | व.जी. 31 पृ. |
| लग्नं रागावृताङ्ग्या | 100 | | वेणीदत्तपद्यावली |
| ललितलवङ्गलता | 124 | | गी.गो.(प्र)० 3 |
| लावण्यौकसि राजनि | 213 पृ. 70 | .... | |
| वक्त्रस्यन्दिस्वेद | 253 | .... | का.प्र. 712 पृ. |
| वक्त्राम्भोजं सरस्व | 107 | | भो.प्र. 230 |
| वपु रुमाधवमाधवयो | 162 | .... | |
| वप्राघातविनोदि | 282 | .... | |
| वस्त्रवैडूर्यचरणैः | 68 | .... | का.प्र. 303 पृ. |
| वागर्थाविव | 161 | | रघु० 1-1 |
| वाताहारतया | 108 | | भ.श. 87 |
| विद्यया विनयावाप्तिः | 24 | .... | |
| विपक्षवृत्ति न सपक्ष | 222 | .... | |
| विललास जलाशयोदरे | 274 | | नै० 2-79 |
| विलोचनं दक्षिण मञ्जनेन | 28 | | रघु० 7-8 |
| वेगा दुड्डीय गगने | 74 | .... | का.प्र. 333 पृ. |
| व्यानम्रा दयितानने | 110 | .... | का.प्र. 434 पृ. |
| शंभो स्ताण्डवडम्बरे | 218 | .... | |
| शनि रशनिश्च | 31 | .... | का.प्र. 134 पृ. |
| शातकुम्भमयकुम्भ | 228 | .... | |
| शिरीषा दपि मृद्वङ्गी | 257 | | नव० 28 |

| | | | |
|---|---|---|---|
| शैलेन्द्रप्रतिपाद्य | 247 | .... | का.प्र. 701 पृ. |
| श्यामचामर | 185 | .... | |
| श्यामां श्यामलिमान | 104 | | वि.स.भ. 3–1 |
| श्रीकर्णे मृगयां गते | 273 | .... | |
| श्रीगौडेन्द्र तवार्जिता | 168 | .... | |
| श्रीपरिचया ज्जडा | 42 | | रविगुप्त-सुभाषिते |
| श्रुतेन बुद्धि र्व्यसनेन | 98 | .... | का.प्र. 401 पृ. |
| संकेतकालमनसं | 254 | .... | ध्व.आ. 103 पृ. |
| संग्रामाङ्गण मागतेन | 210 | .... | स.क.भ. 4–206 |
| संप्रहारे प्रहरणैः | 113 | .... | |
| सखे सदैव मैत्र्येयम् | 155 | .... | |
| सदा मध्ये या सा | 91 | .... | का.प्र. 380 पृ. |
| सदा स्नात्वा निशीथिन्यां | 95 | | का.प्र. 390 पृ. |
| सद्यो मुण्डितमत्तहूण | पृ. 55 | .... | वा.सू. 4–2–2 |
| सन्तुष्टे तिसृणां पुरा | 215. | | अ.रा. 3–41 |
| सम्यग्ज्ञानमहाज्योति | 64 | .... | का.प्र. 281 पृ. |
| सरसीः परिशीलितुं मया | 146 | | नै० 2–40 |
| सव्रीडा दयितानने | 109 | .... | का.प्र. 434 पृ. |
| सा च दूरं सुधासान्द्र | 56 | .... | का.प्र. 295 पृ. |
| साधनं सुमहद्यस्य | 62 | .... | का.प्र. 278 पृ. |
| सा रसवत्ता विहिताः | 144 | | वास० 10 श्लो. |
| सिंहिकासुतसंत्रस्त | 258 | .... | का.आ. 720 पृ. |
| सोऽयं शैलः ककुभ | 241 | | उ.रा. 1–33 |
| स्थाने यस्य चरन्ति भैक्ष | 15 | .... | |

| | | | |
|---|---|---|---|
| स्निग्धश्यामलकान्तिलिप्त | 41 | .... | ध्व.आ. 61 पृ. |
| स्फटिकाकृतिनिर्मल | 77 | .... | का.प्र. 340 पृ. |
| स्वदस्फुद्भुतरूप | 267 | .... | का.प्र. 743 पृ. |
| स्वच्छन्दोच्छलदच्छ | 5 | .... | का.प्र. 22 पृ. |
| स्वपिति याव दयं | 94 | .... | वा.सू. 93 पृ. |
| स्वर्गश्च पृथ्वी च रसा | 179 | .... | |
| स्वल्पंपि भालफलके | 23 | .... | |
| हन्तुमेव प्रवृत्तस्य | 97 | .... | |
| हरस्तु किंचित्परि | 48 | | कु.सं. 3-67 |
| हृतमारमिवेन्दु | 272 | | नै० 2-25 |
| हृदय मधिष्ठित मादौ | 202 | | कुट्टि० 96 |

# कारिकानुक्रमणिका

| | | |
|---|---|---|
| | | पृष्ठ: |
| 1. | अगूढ मपरस्याङ्गं | 23 |
| 2. | अङ्गिनोऽननु | 42 |
| 3. | अतादृशि गुणीभूत | 3 |
| 4. | अनवीकृत: | 35 |
| 5. | अनुमानं तदुक्तं यत् | 77 |
| 6. | अनुस्वानाभसंलक्ष्य | 17 |
| 7. | अन्य स्त्प्रकुर्वत: कार्यं | 82 |
| 8. | अप्रस्तुतप्रशंसा या | 65 |
| 9. | अभवन्वस्तुसंबन्ध | 64 |
| 10. | अर्थशक्त्युद्भवोऽप्यर्थ | 18 |
| 11. | अर्थे सत्यर्थभिन्नानां | 57 |
| 12. | अर्थोऽपुष्ट: कष्टो | 35 |
| 13. | अर्थान्तरैकवाचक | 30 |
| 14. | अलङ्कारोऽथ वस्त्वेव | 18 |
| 15. | अविश्रान्तिजुषा मात्म | 84 |
| 16. | असकृद् यदसंभाव्यं | 79 |
| 17. | आह्लादकत्वं माधुर्यं | 46 |
| 18. | इद मुत्तम मतिशयिनि | 3 |
| 19. | उत्तरश्रुतिमात्रत: | 79 |
| 20. | उत्तरोत्तर मुत्कर्ष: | 80 |
| 21. | उदात्तं वस्तुन: संपत् | 76 |
| 22. | उपमाना यदन्यस्य | 69 |

23. उपमानोपमेयत्वे 60
24. एकं क्रमेणानेकस्मिन् 77
25. एकस्य च ग्रहे न्याय 84
26. एकस्याप्यसकृत्पर: 56
27. कारणा न्यथ कार्याणि 9
28. कार्यकारणयोर्यश्च 66
29. काव्यं यशसेऽर्थकृते 2
30. काव्यलिङ्ग हेतो: 74
31. कुतोऽपि लक्षित: 79
32. क्वचि द्यदतिवैधर्म्याद् 80
33. किञ्चि त्पृष्ठ मपृष्टं वा 78
34. क्रियाया: प्रतिषेधेऽपि 70
35. गुणक्रियाभ्यां कार्यस्य 80
36. गुणवृत्त्या पुन स्तेषां 47
37. तच्चित्रं यत्र वर्णानां 59
38. तत्सिद्धिहेता वेकस्मिन् 75, 77
39. त ददोषौ शब्दार्थौ 2
40. ....तदा भासा 15
41. तद्रूपक मभेदो य: 62
42. तद्रूपाननुहारश्चे 83
43. त्रासश्चैव वितर्कश्च 15
44. दीप्त्यात्मविस्तृते र्हेतु: 46
45. दुष्टं पदं श्रुतिकटु 26
46. दृष्टान्त: पुन रेतेषां 76
47. धर्मेण केनचि द्यत्र 79
48. निगीर्याध्यवसानं तु 66

| | | |
|---|---|---|
| 49. | नियतानां सकृध्दर्म: | 69 |
| 50. | नियतिकृतनियमरहितां | 1 |
| 51. | निर्वेदग्लानिशङ्काख्या: | 15 |
| 52. | निषेधो वक्तु मिष्टस्य | 70 |
| 53. | पदैकदेशरचना | 20 |
| 54. | परोक्तिभेदकै: श्लिष्टै: | 64 |
| 55. | परिवृत्ति र्विनिमयो | 74 |
| 56. | पर्यायोक्तं विना वाच्य | 76 |
| 57. | पुनरुक्तवदाभासो | 59 |
| 58. | प्रकृतं य न्निषिध्यान्यत् | 67 |
| 59. | प्रतिकूलवर्ण मुपहत | 30 |
| 60. | प्रतिकूलविभावादि | 42 |
| 61. | प्रतिपक्ष मशक्तेन | 81 |
| 62. | प्रत्यक्षा इव यद्भावा: | 74 |
| 63. | प्रधानत्वेन स ज्ञेय: | 18 |
| 64. | ....प्रबन्धेऽप्यर्थशक्ति | 20 |
| 65. | प्रश्नस्योन्नयनं यत्र | 79 |
| 66. | प्रस्तावदेशकालादे: | 8 |
| 67. | प्रौढोक्तिमात्रसिद्धो वा | 18 |
| 68. | बीभत्सरौद्ररसयो: | 46 |
| 69. | भग्नप्रक्रम मक्रम | 30 |
| 70. | भावस्य शान्ति रुदय: | 16 |
| 71. | भिन्नदेशतयाऽत्यन्तं | 72 |
| 72. | भेदा विमौ च सादृश्यात् | 6 |
| 73. | महतां चोपलक्षणम् | 76 |
| 74. | महतो यन्महीयांसा | 81 |

| | | |
|---|---|---|
| 75. | माधुर्यौजः प्रसादाख्याः | 46 |
| 76. | मालादीपकमाद्यं | 68 |
| 77. | मुख्यार्थहति दोषो | 26 |
| 78. | मुख्ये रसेऽपि तेऽङ्गित्वं | 17 |
| 79. | मूर्ध्नि वर्गान्त्यगाः स्पर्शाः | 47 |
| 80. | यथानुभव मर्थस्य | 67 |
| 81. | यथासंख्यं क्रमेणैव | 71 |
| 82. | यथोत्तरं चेत्पूर्वस्य | 75 |
| 83. | युदक्त मन्यथा वाक्यं | 56 |
| 84. | यद्यथा साधितं केन | 72 |
| 85. | ये रसस्याङ्गिनो धर्माः | 46 |
| 86. | योग आद्यतृतीयाभ्यां | 47 |
| 87. | रति र्देवादिविषया | 14 |
| 88. | रति र्हासश्च शोकश्च | 11 |
| 89. | वक्तृबोद्धव्यकाकूनां | 8 |
| 90. | वक्ष्यमाणोक्तविषयः | 70 |
| 91. | वर्णसाम्य मनुप्रासः | 56 |
| 92. | वर्णाः समासो रचना | 47 |
| 93. | वस्तुनोर्जननेऽन्योयं | 78 |
| 94. | वस्त्वलंकार मथ वा | 18 |
| 95. | वाच्यभेदेन भिन्ना यद् | 58 |
| 96. | विना प्रसिद्ध माधारं | 82 |
| 97. | विनोक्तिः सा विनान्येन | 73 |
| 98. | विभावा अनुभावास्तत् | 18 |
| 99. | विरोधः सोऽविरोधेऽपि | 72 |
| 100. | विशेषणै र्यत्साकूतैः | 77 |

101. विशेषोक्ति रखण्डेषु 71
102. व्यङ्ग्य मेवं गुणीभूत 23
103. व्याजस्तुति र्मुखे निन्दा 73
104. व्याजोक्ति श्छद्मनोद्भिन्न 78
105. व्याप्तो त्यन्य त्प्रसादोऽसौ 46
106. व्यभिचारिरसस्थायि 42
107. व्रीडा चपलता हर्ष 15
108 शक्ति निपुणता लोक 2
109. शब्दार्थोभयशक्त्युत्थं 17
110. शाब्दस्तु लाटानुप्रासो 57
111. शृङ्गारहास्यकरुणा 11
112. श्रुतिमात्रेण शब्दानां 49
113. श्लेष: स वाक्ये एकस्मिन् 63
114. सन्दिग्ध मप्रतीतं ग्राम्यं 26
115. सन्दिग्धे निर्हेतु: 35
116. सकृद् वृत्तिस्तु धर्मस्य 68
117. समं समतया योगो 80
118. समाधि: सुकरं कार्यं 75
119. संभावन मथोत्प्रेक्षा 61
120. स सन्देहस्तु भेदोक्तौ 61
121. साकांक्षो पदयुक्त: 35
122. सामान्यस्य द्विरेकस्य 67
123. सा सहोक्ति: सहार्थस्य 73
124. सुप्तं विविधोऽमर्षश्च 15
125. सेष्टा संसृष्टि रेतेषां 83
126. सोऽनेकस्य सकृत्पूर्व: 56

127. स्थाप्यतेऽपोह्यते वापि 82
128. स्फुट मेकत्र विषये 85
129. स्या द्वाचको लाक्षणिक: 5
130. स्वभावोक्तिस्तु डिम्भादे: 73
131. स्वमुत्सृज्य गुणं योगात् **83**
132. स्वस्वहेत्वन्वयस्योक्ति: 64

# मुक्तककारिकाः [श्लोकाः]

पृष्ठः

.... 69
1. आक्षेप उपमानस्य .... 8
2. इत्थं संचूर्णितास्सर्वे .... 12
3. इष्ट नाशादिभिश्चेतो .... 12
4. तत्त्वज्ञाना द्य दीर्ष्यादिः .... 12
5. दोषेक्षणादिभि गर्हा: .... 13
6. न यत्र दुःखं न सुखं न चिन्ता .... 53
7. पदार्थे वाक्यरचनम् (KSV. III. ii. 2) 5
8. मुख्यार्थान्वयवाधे स्याद् 12
9. रौद्रशक्त्या तु जनितम् .... 81
10. विधीयते य द्रूलवत् 5
11. शक्तिमत्वं वाचकत्वम् 48
12. श्लेषः प्रसादः समता (का० 1-41,42) 71
13. सामान्यं वा विशेषो वा

98173
25/7/2000